श्रीविजयनेमिसूरीश्वरग्रन्थमालारत्नम् – ६५

कविश्रीसहजकीर्तियतीन्द्र-

विरचितं

# श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम् ।

शासनसम्राट्–सूरिचक्रचक्रवर्ति–तपोगच्छाधिपति-

श्रीमद्विजयनेमिसूरीश्वरपट्टालंकार-व्याकरण-

वाचस्पति–शास्त्रविशारद–कविरत्नेति-

पदालंकृतश्रीविजयलावण्यसूरीश्वर-

पट्टालंकृताचार्यश्रीमद्विजयदक्ष-

सूरिपट्टालंकारः आचार्यः

**श्रीविजयसुशीलसूरिः ।**

प्रकाशकः

श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिरस्य कार्यवाहकः

बोटाद (सौराष्ट्र)

मूल्यम – रू[illegible]म

प्रकाशक
चीमनलाल हरिचन्द बगडिया
कार्यवाहकः श्रीविजयलावण्यसूरीश्वरज्ञानमन्दिर
बोटाद (सौराष्ट्र)

वीर सं० २४९४
वी० सं० २०२४
नेमि सं० १९
प्रथमावृत्ति

मुद्रक
वैद्यराज श्रीत्रिभुवनदासजी शास्त्री
श्रीरामानन्द प्रिन्टिंग प्रेस
कांकरिया रोड
अमदावाद-२२

# सम्पादकीय

'फलवर्धिपार्श्वनाथमाहात्म्यमहाकाव्य' नामक ग्रंथनी हस्तलिखित प्रति अमदावादना ला० द० भारतीय संस्कृति विद्यामंदिरना संग्रहमांथी पं० अंबालाल प्रेमचन्द्र शाह द्वारा प्राप्त थई । ए प्रति उपर्युक्त संग्रहना नं० १०९३४ मां छे । अगियार पत्रोनी आ प्रति प्रायः शुद्ध छे । ते प्रतिनुं माप ५.३ लंबाई अने १९.२ पहोळाई छे । दरेक पत्रमां १६ लीटी अने प्रत्येक लीटीमां ५८ वर्णो आशरे लखेला छे । सत्तरमी सदीमां लखायेली आ प्रतिनी बीजी पोथी बीजा भंडारोनां केटलोग जोतां सुलभ न होय एम अमने लागे छे ।

आ प्रतिने जोतां ज एने संशोधित–संपादित करवानो में निर्णय कर्यो प्रतिनी प्रेसकोपी करावी एनुं संशोधन कर्युं । बोटादना श्रीविजयलावण्यसूरिज्ञानमंदिरना कार्यवाहकोने आ पुस्तक विशे माहिती मळतां पुस्तक प्रेसमां आपवानो निर्णय कर्यो । परिणामे आजे आ ग्रंथ आ स्वरूपे वाचकोना हाथमां मूकवामां आवे छे ।

काव्यनुं कद नानुं छे, छतां कर्ताए एने 'महाकाव्य' कह्युं छे, केमके चोवीश सर्गना विस्तारमां कर्ताए महाकाव्यनां बधांये लक्षणोनो खूबीथी समावेश कर्यो छे । काव्यमां देश–नगर, राजा–राणी, पुत्रजन्म, सूर्योदय, बालक्रीडा, यौवनवय, तत्कालीन आचारो, राणीनां अंगोपांग, छ ऋतुओ, सूर्यास्त, चारित्रग्रहण, केवलज्ञान, सर्वज्ञना गुणो, उपदेश, देवसुख, तिर्यञ्च अने नरक वेदना, अने छेवटे

जिनेश्वरना गुणो—आदि वर्णनोने चित्रात्मक उपासाववानी कला कर्ताने सिद्धहस्त होय एवुं प्रतीत थाय छे। जूदा जूदा छंदो अलंकारो अने व्याकरणना नव्य प्रयोगोथी कर्तानुं पांडित्य अने प्रतिभा आमां झळकी उठ्या विना रहेतां नथी।

कवि श्रीसहजकीर्तिगणिना गार्हस्थ्यजीवन पर प्रकाश पाडे एवी सामग्री अमने मळी नथी, परंतु मुनिजीवनमां एमणे जे कृतिओनुं सर्जन कर्युं छे तेमां संस्कृत अने गुजरातीनी मळीने २० जेटली कृतिओ रच्यानी हकीकत श्री. मोहनलाल दलीचंद देसाई कृत 'जैन साहित्यनो संक्षिप्त इतिहास' अने 'जैन गूर्जर कविओ'मांथी आ रीते जाणवा मळे छे।

कवि सहजकीर्तिगणि खरतरगच्छीय क्षेमशाखामां थयेला आ० जिनसागरसूरि, तेमना शिष्य वाचक रत्नसारना शिष्य हता। तेओ विक्रमनी सत्तरमी सदीमां विद्यमान हता। तेमनी मळी आवती कृतिओनो रचनासमय जोतां तेमणे वि० सं० १६६१ थी १६९७ सुधीमां संस्कृतमां आगम, व्याकरण, कोश, अने स्तुतिसाहित्य विषयना तेमज गुजरातीमां रासा, गीत, चोपाई चैत्यपरिपाटीना ग्रंथो रच्या छे।

तेमणे संस्कृत आगममां—१ कल्पसूत्र पर 'कल्पमञ्जरी' नामक वृत्ति सं० १६८५, २ अनेकशास्त्रसारसमुच्चय रच्या छे। व्याकरणमां ३ शब्दार्णवव्याकरण—सवृत्ति (सटीक) अपरनाम ऋजुप्राज्ञ-व्याकरण, ४ सारस्वतसूत्रो पर वृत्ति सं० १६८१, ५ एकादि—शत

पर्यन्तशब्दसाधनिका रच्या छे। ६ कोशमां—नामकोश (छ कांड-मय) ७ स्तुतिओमां—चित्रमय काव्यरूपे—शतदलकमलालंकृत लोद्रपुरीयपार्श्वजिनस्तुति सं० १६८३, ८ महावीरस्तुति सं० १६४६ अने महाकाव्यमां—९ फलवर्द्धिपार्श्वनाथमाहात्म्यमहा-काव्य आदि ग्रंथो रच्या छे।

गुजराती साहित्यमां—१० सुदर्शनश्रेष्ठिरास सं० १६६१, ११ कलावतीरास सं० १६६७, १२ व्यसनसित्तरी सं० १६६८, १३ देवराज–वत्सराज चौपाई सं० १६७३, १४ सागरश्रेष्ठि-कथा सं० १६७५, १५ जेसलमेरचैत्यप्रवाडी सं० १६७९, १६ शत्रुञ्जयमाहात्म्य सं० १६८४, १७ शीलरास सं० १६८६, १८ प्रीतिछत्रीशी सं० १६८८, १९ हरिश्चन्द्र चोपाई सं० १६९७, अने २० जिनराजसूरिगीत आदि विशाल साहित्यग्रंथोनी रचना करी जैन साहित्यने समृद्ध करवामां गौरवशाळी फाळो अर्प्यो छे।

आ काव्यमां कर्ताए पोताना गुरु, गच्छ के तेमनी इतर कृतिओ विशे सहेज पण इशारो कर्यो नथी। संभव छे के अमने मळेली प्रतिमां पाछळनी प्रशस्ति वगेरे लखवां रही गयां होय। छतांय एटलुं स्पष्ट छे के, कर्तानी बीजी कृतिओ न होय तोपण आ 'फलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्य' ए एक मात्र कृति ज तेमने एक प्रौढ कवि तरीकेनी ख्याति अपावे एवुं छे, एमां शंका नथी। संभव छे के, आ काव्य तेमनी अंतिम कृति होय अने प्रशस्ति लखवी रही गई होय।

अमने तो काव्यनी संस्कृत टीका रचवानी इच्छा हती परन्तु बीजां अनेक कार्यो होवाथी आ काव्यने मूळरूपे प्रकाशित कराववामां विलंब करवानुं ठीक न लाग्युं ।

आ पुस्तकना संपादनमां पं० अंबालाल प्रेमचन्द शाहे सहयोग आप्यो छे अने प्रुफरीडींग करी आप्युं छे ते बदल तेमने धन्यवाद घटे छे।

वि० सं० २०२४, वसंतपंचमी
रामसेन, जैन उपाश्रय
(राजस्थान)

विजयसुशीलसूरि

# विषयसूची


१ श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम्,

तत्र स्तुतिफलाविर्भावकः प्रथमः सर्गः । १०

२. देश-नगरी-भूप-राज्ञीवर्णनस्वरूपः द्वितीयः सर्गः । १५

३. च्यवन-जन्म-सूर्योदयवर्णनात्मकः तृतीयः सर्गः । १४

४. बालक्रीडावर्णनात्मकश्चतुर्थः सर्गः । ११

५. यौवनवर्णन—तत्समयाचारवर्णनात्मकः पञ्चमः सर्गः । १०

६. प्रभावतीरूपवर्णनात्मकः षष्ठः सर्गः । ११

७. संग्रामवर्णन-कन्याप्रदानात्मकः सप्तमः सर्गः । १३

८. प्रभावत्यङ्गोपाङ्गविभागवर्णनात्मकोऽष्टमः सर्गः । १७

९. प्रावृट्कालवर्णनात्मको नवमः सर्गः । १४

१०. शारदवर्णनात्मको दशमः सर्गः । १३

११. हेमन्तकालवर्णनात्मक एकादशः सर्गः । ९

१२. शिशिरकालवर्णनात्मकः द्वादशः सर्गः । १०

१३. पार्श्वनाथ-प्रभावतीक्रीडावसन्तकालवर्णनात्मकस्त्रयोदशः सर्गः । २१

१४. ग्रीष्मवर्णनात्मकश्चतुर्दशः सर्गः । ११

१५. सूर्यास्तसमयवर्णन-चारित्र-केवलज्ञानोत्पत्तिवर्णनात्मकः पञ्चदशः सर्गः । १३

१६. सर्वज्ञगुणवर्णनात्मकः षोडशः सर्गः । १०

१७. सम्मेतशिखरवर्णन—वनवर्णन-सागरवर्णन—श्रीपार्श्वनिर्वाण—गमनवर्णनात्मकः सप्तदशः सर्गः । २३

१८. श्रावकधर्मप्राप्तिफलाविर्भावकोऽष्टादशः सर्गः । १०

१९. देवसुखवर्णनात्मकः एकोनविंशतितमः सर्गः । १०

२०. देवसुखशक्ति—पुष्पकविमानवर्णनात्मको विंशतितमः सर्गः । २०

२१. चारित्रफलाविर्भावक एकोनविंशतितमः सर्गः । १०

२२. जिननामफलाविर्भावकः द्वाविंशतितमः सर्गः । १०

२३. तिरश्च—नारकवेदनाविर्भावकस्त्रयोविंशतितमः सर्गः । १५

२४. जिनगुणाविर्भावकश्चतुर्विंशतितमः सर्गः । १०

श्रीसहजकीर्तियतीन्द्रविरचितं

# श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम् ।

[ १ ]

## तत्र स्तुतिफलाविभावकः

### प्रथमः सर्गः ।

श्रीभर्तुर्धरणेन्द्रपद्मसवितुर्भव्यावलीरक्षितु-
हर्न्तुः कर्म्मततेर्विधातुरमरश्रीशान्तिमुक्तिश्रियाम् ।
नेतुर्गच्छपतेः प्रहर्तुरशिवासातस्य सातात्मनः
कर्तुं पार्श्वजिनेशितुः स्तुतिमहं यत्नं विधास्येऽभितः ॥१॥

प्रासादं यदि रोहति स्वयमसावभ्रंलिहं मानवः
श्रोणोऽहेर्वदनं चुचुम्बिषति ना मन्त्रादिहीनो यदि ।
पापो गच्छति मोक्षमक्षतकलिः श्लोकं यदि प्राप्नुयाद्
विश्वाधीशगुणस्तुतिं तव तदा कर्तुं समर्थः शठः ॥२॥

यद्येवं हि तथापि निर्गुणमतिः स्तोष्ये भवन्तं किल
प्रेक्ष्य प्राक्तनवृद्धसूरिरचनां स्तोत्रस्य तेऽनेकशः ।
अध्वज्ञोऽध्वनि याति निश्चलमनाः पृच्छँस्तथा ना परः
किं यातीह समीहितार्थघटना तुल्या भवेन्नोभयोः ॥३॥

दुःखानां च्युतिरस्मृतिः क्षितिततेर्व्युत्सृष्टिरापद्गतेः
सृष्टिः सर्व्वगुणस्य लब्धिनिकरस्याकृष्टिरत्युत्तमा ।
वृष्टिः पुण्यजलस्य केवलरमामृष्टिः सतां जायते
यस्यास्तां परमां स्तुतिं जिनपतेर्भक्त्या करिष्ये भृशम् ॥४॥

ऋद्धिं या कुरुते सुरा विदधते यां तां लभन्ते यया
यस्यै के स्पृहयन्ति नो भवजलं यस्यास्तरन्ति क्षितौ ।
यस्याः शक्तिरभूत् परा गुणगणो यस्यां श्रितः सम्मतः
सा जीयाद् महती सती गुणवती पार्श्व ! त्वदीया स्तुतिः ॥५॥

मुक्तिं केऽपि सुरेश्वरत्वमपि के सर्वार्थसिद्धिं च के
चक्रित्वं च तदर्धवैभवमपि [ये] प्राप्य स्तुतेस्ते जनाः ।
राजन्ते किमसौ विभिन्नफलदा जाता न चित्रं प्रभो !
यद्वा भूमिगता विचित्रफलदा तोयावली मेघजा ॥६॥

दादेति स्वधनं क्रियां सुविशदां यश्चर्करीति क्षितौ
वावक्ति प्रवरं वचः परधनं नो जर्गृहीति प्रियम् ।
पारक्यां न च वावशीति ललनां मूर्च्छां विदाधेति नो
द्रव्ये स्वेऽपि न वोभुजीति निशि यस्त्यक्ताभिलाषः सृतौ ॥७॥

वामेयस्तुतिमन्तरेण स जनः स्वार्थं न पूर्णं स्वकं
सासाधीति सुभिक्षमत्र विपुलं वर्षां विना सत्स्वपि ।
पृथ्व्यां भूरिजलाशयेषु वचने काये तथा मानसे
ज्ञात्वैतं फलमुत्तमं स्तुतिविधौ जातोद्यमः सांप्रतम् ॥८॥युग्मम्॥

स्वर्गो या परिरंरमीति विरेऽप्याजङ्गमीति स्वतो
लोकेऽमुत्र सरीसरीति न कदा कुत्रापि जार्गृद्धि या ।
आनन्दं वितरीतरीति जगतो लालब्धि कीर्तिं परां
किं किं नाथ ! तव स्तुतेस्तनुधिया सद्वर्णनं वर्ण्यते ॥९॥

एतां प्राप्य जनो वृथा धनकृते देशान्तरं भ्राम्यति
क्लाम्यत्यत्र कथं तनूद्भवकृते ताम्यत्यहो ! स्त्रीकृते ।
सर्व्वं यच्छति कामितार्थमचिरादेषा समासेविता
लोके कल्पलतेव सत्यवचनं जानीत भो ! मामकम् ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते
श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये
स्तुतिफलाविर्भावकः प्रथमः सर्गः ॥

## देश-नगरी-भूप-राज्ञीवर्णनस्वरूपः

### द्वितीयः सर्गः ।

नामस्तुतिश्रवणमेव करोति सौख्यं
पापं क्षणोति चरितस्य कृतिस्तु दूरे ।
पीतिर्जलस्य तृषितस्य यथा जिनेश–
स्थाने जलश्र(स्र)वणमेव समाधिहेतुः ॥१॥

एवं विमृश्य जिननायक ! तावकीनं
स्वस्मै हिताय विदितं चरितं करिष्ये ।
वाणिज्यमत्र वणिगेव यथैक्ष्य लाभं
किं किं जनो हितपरो न हितं करोति ? ॥२॥

जैनं चरित्रमिदमस्ति विचिन्त्य पूतं
श्रोतव्यमत्र विदुषां ननु नो शठोक्तम् ।
काचस्य खण्डमिव काञ्चनमध्यमग्नं
ग्राह्यं भवेत् सुमनसां तदभेदबुद्धया ॥३॥

ये दुर्धियो विपुलमत्सरिणोऽगुणज्ञा–
स्त्यक्ष्यन्ति काञ्चनमपि ते व्यतिरेकबुद्धया ।
अन्नं सुतृप्तिजनकं लवणैकदेशं
मन्दास्त्यजन्ति सुधियः पुनरादियन्ते ॥४॥

कासीति देश इह भारतवर्षमध्ये
गङ्गासरित् प्रतिदिनं यमसौ सिषेवे ।
मन्ये समृद्ध इति भावमुपागतेयं
तुष्टः परं किमपि मे परिदास्यतीति ॥५॥

वाराणसीति नगरी न गरीयसीति
यस्माज्जडं वहति नो सुधियो नरांश्च ।
अस्या विचिन्त्य परितः परिवेष्ट्य सेवां
गङ्गा करोति सततं परिनिर्जितेव ॥६॥

यद्वा महापुरुषयोनिरियं सदैव
प्रेक्ष्या मया सुकृतदा जलदेन काले ।
धौतक्रमाक्रमजलेन पवित्रिताङ्गी
यद्वा गतेन मयि तां भविताऽस्मि सेवे ॥७॥

अस्यास्तु सङ्गममहं सुतरामवाप्य
विश्वत्रयी सवनमाननपूजनाभिः ।
जाता प्रसिद्धिमतुलां किल तीर्थभूतां
सत्सङ्गमो भवति सत्फलदो हि नित्यम् ॥८॥

अश्वा रथाः करटिनो बहुपत्तयश्च
राजन्ति यस्य निलयेष्वथ नामधेयम् ।
भूपाश्वसेन इति रूढिवशाद् बभूव
नान्वर्थमर्थपरिवारविराजमानम् ॥९॥

भूतानि पञ्च जलदो रवि-सोम-भौमाः
सौम्यो गुरुः कवि-शनी शिखि-सैंहिकेयौ ।
सर्वेऽपि राजति नृपे समतामवापु-
राधिक्यहीनमपहाय गतेर्गुणानाम् ॥१०॥

वैरं कुमार्गगमनं धननाश ईति –
र्वर्षात्ययः कुमतिरर्त्तिरनीतिबन्धः ।

मारिर्वियोग-कलहौ विविधाश्च रोगा-
स्तस्मिन् नृपे जगति शासति नाशमीयुः ॥११॥
पुत्री धनी वितरणी प्रशमी गुणी ही
धर्मी प्रसन्नहृदयी सुनयी विवेकी ।
तीर्थी परार्थविजयी सुमती जयी च
लोकोऽस्ति शासति नृपे न च नञ्समासः ॥१२॥
हिंसा हृषीकमनसो रसतो व्यलीकं
चौर्यं सदा परगुणस्य परिग्रहोऽपि ।
मिथ्यामतेरहरहः परिखण्डनं च
राज्यं प्रशासति नृपे सकृपे विदर्प्पे ॥१३॥
आजन्मतः सुमति-सद्गतिभागधेय-
लावण्यरूपघटना च कलाकलापः ।
यस्या विधूततमसोऽजनि वृद्धिमासीद्
वामेति नाम महिषी सुमुखी नृपस्य ॥१४॥
आजन्मतोऽपि तनुवाग् हृदयेषु यस्याः
साहाय्यमाप्य वसति स्म सुखं गुणानाम् ।
शीलं सलीलमतुलश्रि ततः प्रभुत्वं
लेभे स्वशक्तिवशतः सकलेषु तेषु ॥१५॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथ-
माहात्म्ये महाकाव्ये देश-नगरी-नृप-
राज्ञीवर्णनस्वरूपो द्वितीयः सर्गः ॥

## च्यवन-जन्म-सूर्योदयवर्णनात्मकः
## तृतीयः सर्गः ।

अथ नागपतिप्रणतो मरुतां सुखतामनुभूय चिरं विरतः ।
जनितोत्तमतीर्थकरोच्चपदोऽजनि राजकुले विमले विमले ॥१॥

महिषीसुखगर्भगतः शुशुभे सरसीतमराल इवाद्रितटे ।
सुरसाल इवोत्तमशुक्तिपुटेऽक्षतमौक्तिकवत् [शुशुभे] तविषे ॥२॥

धरणीरमणी नृपतेर्महिषी तनये सनये परिवृद्धिमिते ।
गरभे ववृधे धन-सस्यगणैः परिमुच्य विरोधमभुक्तिभवम् ॥३॥

दिवसे दिवसे स्ववशं नयते क्षितिमण्डलमत्तगजाश्व-रथैः ।
नृपचक्रमवक्रगतिः स्म नयी सदयः सदयः सदयः सदयः ॥४॥

हृदये हितवृत्तिरृतं वचनेऽहृतिरुत्तमपाणिपुटे सुघटे ।
नृपतेरिह भूवलये सुयशो रमते रमते रमते रमते ॥५॥

तरणावथ मेषमिते सवृषे भपतौ च कुजे मकरं मिलिते ।
शशिजेऽत्र कनीं परिभुक्तवति धिषणे शुभकर्कपथं प्रथिते ॥६॥

पृथुरोमरते किल दैत्यगुरौ रविजे च तुलापरिभोगमिते ।
समये परिपूर्णनिशीथकले परिवर्धितपुण्यमनोरथके ॥७॥

सकले सकलेऽपि समृद्धिमिते सति राजकुले विपुले महिषी ।
असिते च सहस्यदिने दशमी शुभनाम्नि सती सुषुवे तनयम् ॥८॥

पशु-नारक-पञ्चजना निमिषा हृदयोत्थमलं सुखमापुरमी ।
भुवनं मुमुदे धन-धान्य-सुत-प्रकरोत्तमबन्धुरबन्धुजनम् ॥९॥

समदं रतिकेलिपरं विहगं कृतकोककुलप्रमदप्रकरः ।
दिततामसलोकविचारपथः पथिकप्रथितागमकर्मकलः ॥१०॥
विदधज्जिनपार्श्वमुखं विमुखं भवतः किमु तक्षितुमस्तमलम् ।
दिनकृत्त्वमिति स्वकमर्थयुतं कथयन्नभिधानमहीनरुचिः ॥११॥
कमलौघमलं सुपरागकलं सलिलं च विसारकुलं सकलम् ।
गतनिद्रविकाशमुखं विदधत् परितोषमुपोषवनं सघनम् ॥१२॥
कुवलं कुबलं परिशोकयुतं कृतकौशिकपक्षपराभिभवः ।
कुरुते हि समर्थजनो निजकं परकं सुसमृद्धिमवृद्धिपरम् ॥१३॥
अरुणाक्षमुखः प्रतिपक्षमिवोद्दलति स्म तमःप्रसरं वितमाः ।
उदयाद्रिगजं रविरात्तजयः श्रयति स्म तदोषसि चाशुगतिः ॥१४॥

पञ्चभिः कुलकम् ॥ तोटकछन्दः ॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफल[व]र्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये च्यवन–
जन्म-सूर्योदयवर्णनात्मकः
तृतीयः सर्गः ॥

## बालक्रीडावर्णनात्मकः
## चतुर्थः सर्गः ।

प्रातराशीर्वचःश्रेणिसज्जल्पनं तूर्यघोषोद्गमं गीतगानप्रियम् ।
राजसद्म प्रभाप्रेमपात्रं बभौ दीयमाना प्रमाणोत्तमस्पर्शनम् ॥१॥

ज्ञातपुत्रावतारोऽथ भूमीधवोऽमन्यतात्मानमुच्चैःफलप्रापिणम् ।
वृद्धशाखीव संपूर्णराज्यस्थितिर्नास्ति पुत्रात् समं संसृतौ सत्फलम् ॥२॥

रत्नगर्भेति नामाजनिष्ट प्रियं सार्थकं सद्गरावत् प्रमाणं मम ।
जातहर्षेति वामाऽपि भर्त्रा समं नास्ति सूनोः समं भूषणं हि स्त्रियाः॥

दत्तपार्श्वेति नामा प्रभुः प्रत्यहं वर्धमानः प्रमोदेन पित्रोरिव ।
निर्जरालीभिरङ्काङ्कमध्यस्थितः कल्पवृक्षो यथा पञ्चभिर्मातृभिः ॥४॥

केलिभिः क्रीडति स्मात्मतुल्यैः समं बालकैर्बालभावो न चास्ति प्रभौ ।
ज्ञानरत्नत्रयाली न पुण्यात्मनि प्रेम पित्रोः परं वर्द्धतां केवलम् ॥५॥

घुर्घरीणां क्रमस्थायिनीतं रवो मातृ-पित्रोर्मुदं संततानाधिकाम् ।
मोहराजः प्रभोरग्रतः स्म च्छलं संविधाय स्वकं वीर्यमाज्ञीप्सति ॥६॥

अर्भकं क्रोडदेशे समेतं प्रसूः रन्तुकामं चुचुम्ब स्मितं हर्षभाक् ।
ज्ञातमेतत् प्रभुर्मोहदस्युं स्वयं प्राप्नुवन्तं हसत्येव तं तं क्षणम् ॥७॥

जातु बालं विभूष्यामितैर्भूषणैः स्कन्धमारोप्य च क्रीडयन्ति स्म तम्
ज्ञापयन्त्यो जनान् पुण्यमच्छं यशो भूधवस्यास्य वंशस्य सन्मूर्तिमत्॥८

जातु तं बालकं स्वर्णभूषावृतं राजदन्तावलस्योत्तमाङ्गस्थितम् ।
राजमार्गे भ्रमन्तं नदत्तुर्यकं नागरं नागरा एवमस्ताविषुः ॥९॥

धायिनं शुद्धरत्नत्रयस्याधिकं त्रायिणं सत्त्वसंघस्य संयायिनम् ।
मोक्षसौख्याध्वनः सायिनं कर्मणां बालपर्यायिणं त्वां सुसेवामहे ॥१०॥
—स्रग्विणीछन्दः ।

बालक्रीडामपरिमितिकामेवमादर्श्य पित्रो-
मोहस्पर्शां समयरसिकां लौकिकाचारवृत्तिम् ।
कान्ता कान्तं मदनजननं लब्धलावण्यभोगं
सीमायातं कमनशमनो यौवनं प्राप नाथः ॥११॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये बालक्रीडा-
वर्णनात्मकश्चतुर्थः सर्गः ॥

## यौवनवर्णन-तत्समयाचारवर्णनात्मकः

### पञ्चमः सर्गः ।

विलोक्य क्षमानायकं मोहवप्रु—
द्विषं शङ्कमानो जगामाङ्गमध्यम् ।
प्रभोर्यौवनाक्रान्तचित्तो मनोजः
स्फुरन्मन्त्रिणो मन्त्रहूतो यथाऽहिः ॥१॥

वपुर्नेत्रयुग्मं गतिं वक्रमक्ष—
व्रजं मन्मथः वीर्यशक्त्या सरन्त्याम् ।
प्रभोर्दीपयामास दीप्तान्यपीत्थं
रसोपेतसस्यं यथा मर्त्यलोके ॥२॥

इदं कार्यमेतन्न कार्यं न पेयं
तथा पेयमेतन्न गम्यं च गम्यम् ।
न योग्यं तथा योग्यमेतन्न हेयं
तथा हेयमित्यादिका लोकनीतिः ॥३॥

समेते मनोजे हृदि प्राणभाजां
चिरान्नं न शीतीव मद्ये विपीते ।
परं वीतसङ्गस्य सङ्गं प्रपन्नो
यथा तीर्थनाथस्तथा चाचलीति ॥४॥

कुमारे स्फुरद्यौवने द्यूतमांसे
सुरापान-वेश्यागमौ प्राणिहिंसाम् ।

परस्त्रीरतिं चौरकर्मान्यनिन्दां
 पुरे विप्रलम्भं परच्छिद्रवृत्तिम् ॥५॥
कुनीतिं कुवृत्तिं कराधिक्यदानं
 मिथः कूटसाक्षित्वमल्पाधिकं च ।
परद्रव्यरक्षापहारं च लोको
 न कर्तुं क्षमश्चेतसाऽपि प्रमादात् ॥६॥
कुमारेण दृष्ट्या पुरं वीक्ष्यमाणं
 सुधावृष्टिसृष्ट्या तरां वर्वृधीति ।
प्रस(शा)स्यं यथा क्षेत्रमासारपूर्णं
 घनेनाशु पुण्याम्भसा पूरितेन ॥७॥
तदा तापसो दुस्तपा दुष्टकर्मा
 कठाख्योऽक्षमापूर्णगात्रः समेतः ।
पुरीकानने लोकवर्गोऽनुयातो–
 ऽभिनन्तुं कुमारोऽपि मात्राग्रहाच्च ॥८॥

ज्वलत्किंकुलं दन्दशूकस्य दृष्ट्वा–
 ऽवधिज्ञानतो जातशूकः स्वयम्भूः ।
प्रदर्श्याशुभोऽयं जनस्येति दुष्टो–
 ऽकरोन्नागराजं महामन्त्रशक्त्या ॥९॥
कुमारं पदं भूषयन्नेवमेवं
 परस्योपकारानेकांश्च कुर्वन् ।

क्षमामण्डले कीर्तिमाळां विशालां
कुमारो बभाज प्रियां कण्ठपीठे ॥१०॥

—भुजङ्गप्रयातच्छन्दः ।

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये यौवन-
वर्णन-तत्समयाचारवर्णनात्मकः
पञ्चमः सर्गः ॥ ५॥

[ ६ ]

## प्रभावतीरूपवर्णनात्मकः

### षष्ठः सर्गः ।

अथ कुशस्थलपुरे प्रसेनजित्
नरपतेर्गुणवती प्रभावती ।
स्वतनुभूर्ललितगात्रपद्धति–
र्मदनकेलिसरसाऽस्य दंसती ॥१॥

विशदरोमवनराजिराजितं
धमनिराशिजलबन्धशोभितम् ।
सुतनुघाटतटसीमसालिकं
सुतर तीर्थसुमनो मनोहरम् ॥२॥

लवणिमाङ्गसलिलप्रपूरपूरितं
नयनचक्र-कर-पाद-मस्तकाः ।
कमलतामभिसरन्ति यत्र त–
च्छदनमेवमुपमीयते क्रमात् ॥३॥

विमलपक्ष्मरदनच्छदाङ्गुली–
चिकुरपाशमथ नर्कुटादिकम् ।
विहगवृन्दमपि यत्र तिष्ठति
प्रलभते च मुदमीहितां प्रियाम् ॥४॥

कुच-भुजादिपृथुरोमसन्तति–
र्वसति यत्र मदनप्रसङ्गतः ।

चलति च स्वपिति तं विना सना
सति रवौ निशि च मत्स्यपङ्क्तिवत् ॥५॥

सर इवेयमुपमीयते स्म सा
कृतिसुखाय विधिना विनिर्मिता ।
गुणगणो भुवि रराज यः स्म तां
स सकलोऽपि सनिदानमश्नुते ॥६॥

तिलकदम्भमपहाय गात्रतो
गुणविरोधि गतवत् क्षमातलात् ।
सति रवौ तम इवाशु गह्वरे
स्वलववद् बुधजनैर्विचार्यते ॥७॥

विधिरिमां गुणनिधिं ददौ जने
सुखहिताय च सुधां मरुद्गणे ।
उभय एव न निपीय यां यत–
श्चिरमवापुरतितोषमाभवम् ॥८॥

अनमिको वृषमपश्यदद्भुतं
फलमवेक्ष्य कलरूपनिर्मितम् ।
रतिमिमां सुरतजं फलं तथा–
ऽभिक उभावपि सुखं समीयतुः ॥९॥

नृपसुता कनकदीधितिच्छविः
सोऽभिकेय रत्नसञ्चितं सुभूषणा ।

सुरतरोरिव लताच्छदोत्करा
भुवि न कस्य सुखयत्यलं मनः ॥१०॥

—प्रियंवदाछन्दः ।

इत्येवं सा नृपतितनया वृद्धिभावं प्रपेदे
कल्पागस्य व्रततिरिव भूस्थायिनो ये नरेन्द्राः ।
जानन्ति स्म प्रवरमहिलां रूपलावण्यखानिं
कामं कामाच्चलितमनसो याचितुं तेऽसमर्थाः ॥११॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते
श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये
प्रभावतीरूपवर्णनात्मकः षष्ठः सर्गः ॥

## संग्रामवर्णन-कन्याप्रदानात्मकः
## सप्तमः सर्गः ।

अथो पराः कुमारिकां वरोचितां
 विशुश्रुवुः स्वदूतमाशु भाषितम् ।
उदीर्य कन्यकामिमामिति प्रयच्छतः
 स्वकं स्वकं विसृष्टवन्त ईश्वराः ॥१॥

स एत्य भूपमुत्तरे पराङ्मुखं
 गतो विलोक्य चाथ ते समत्सराः ।
अरौत्सुरच्छवप्रकं क्षमापतेः
 विधुन्तुदा यथेन्दुमण्डलं शुभम् ॥२॥

कुमारमातली स्वसैन्यसंयुतौ
 कुशस्थले समारतुः स्वयं तदा ।
रणोत्सवस्तयोर्द्वयोश्च सैन्ययो-
 र्बभूव भूभयङ्करो महाबलः ॥३॥

समानशस्त्रवाहनौ विचक्षणौ
 करालकोपकम्पिताखिलाङ्गकौ ।
विपक्षपक्षभाजिनौ जयेषिणौ
 नयोन्मुखौ वियुध्यतः परस्परम् ॥४॥

शराशरि प्रचण्डमानमस्यसि
 क्षरच्छिरो गदागदि क्षमातले ।

रणत्कबन्धबन्धुरं हलाहलि
प्रधीरवीरसंकुलं महारवम् ॥५॥
विदीर्णकुम्भिकुम्भहस्तपुष्कर—
क्षरत्प्रभूतशोणिताक्तभूतलम् ।
मृधं बभूव सैनिकाभिवादनं
प्रणष्टभानुमण्डलं भियो वशात् ॥६॥
स्थितिं स्वकामुभावपि प्रजिष्यतु—
र्निशात्यये पुना रणं वितेनतुः ।
दिदृक्षया सखेलमाशु गुह्यकाः
समारुरम्बरस्थिताः प्रमादिनः ॥७॥
तथैव चण्डचण्डिका पिपासया—
ऽसृजः कुतूहलं वितेनिरे च ताः ।
दशन्ति सैनिका अथो मिथस्तनुं
हयाङ्गिनश्च शिश्रियुः परासुताम् ॥८॥
इह क्षमेशमानिता अहर्निशं
सुराङ्गना वृतास्तथा सुरालये ।
जयेषिणो नरा भवन्ति भूस्पृशां
सुखाय तेन नोऽपि सन्तु भुक्तये ॥९॥
विमृश्य सुन्दरं हृदीति तत्त्वतो
रणे परासुतां सुबिभ्रतामलम् ।
निशाट एकटक् सिवाकिखिश्च ता—
श्चकर्षुरसमिश्रितास्तनू रताः ॥१०॥

जनक्षये वधीयमान एव ते
जयश्रियं गृहाण भूधवाङ्गज ! ।
असूंश्च मेति पाददत्तमस्तका
अवादिषुर्वचोऽवधूय च स्मयम् ॥११॥
अतः परं विरूपमस्य भूपते–
र्विधेयमत्र नेति शिष्टिमाभवम् ।
कुरुध्वमापभाषमाण एव यः (?)
पुरीं स्वकामवाप्तकीर्तिमण्डलः ॥१२॥ युग्मम् ॥
भूपः प्रसेनजिदसौ परिभाव्य चित्ते
भव्योपकारमसकृत् समयोचितं तम् ।
पार्श्वस्य मे भवतु तुकूवरधर्मपत्नी
सीतेव रामनृपतेरवदद् नृपस्य ॥१३॥
–पञ्चचामरच्छन्दः ।

इति श्रीसहजकीर्तियतीन्द्रविरचिते
श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये
संग्रामवर्णन–कन्याप्रदानात्मकः
सप्तमः सर्गः

## प्रभावत्यङ्गोपाङ्गविभाग वर्णनात्मक
## अष्टमः सर्गः ।

अथ मन्दिरेषु सुकृती सदीप्तिषु
प्रमदाकुलेषु रमते स्म कान्तया ।
इव कार्ष्णिरात्तसकलर्द्धिशासनः
स कुमार एवमतुलाङ्गविक्रमः ॥१॥
असिताङ्गयष्टिरवनीशनन्दनः
कलधौतकान्तिरमणीविराजितः ।
जलबालिकान्वित इवाभ्रमण्डलो
जगति प्रमोदविधये बभूव सः ॥२॥
सुतनो ! तवाननविधुश्च चन्द्रमाः
समतां न याति विबुधैर्विचारितः ।
तमसा मलीमसवपुःकलङ्कितो
वसुधासुधारसजनिः सदेधनः ॥३॥
सुरते ! तवेक्षणयुगं तथाम्बुजं
न भजेत तुल्यमपराश्रयस्मितम् ।
असकृद्विभोगमभिकेभमानता-
हरणं विवेकमिति भाजनं सना ॥४॥
सरसे तवाधरमिमं च पल्लवं
सदृशं विदन्ति न कदापि पण्डिताः ।
कमना निपीय यमलं रसाकुलं
सरसं नयन्ति मदनं पुनः पुनः ॥५॥

चपलाक्षि ! कुम्भतुलनां पयोधरौ
कुरुतस्तवातिकठिनौ वृथा वचः ।
परहस्तमर्दमधिगम्य वृद्धितां
नयतोऽर्भकांश्च सरसौ स्वभावतः ॥६॥

सुगते ! ललाटमिषतो रमस्य भूः
मदनस्य चारुतिलको द्रुमोपमः ।
श्रमहा प्रही श्रवणकौ प्रपां भवेद्
वरवेष्टनं विरमति श्रमातुरः ॥७॥

विगतश्रमः सवनमीहतेऽत्र यः
सुकनीनिके ! तव सुनक्रकीरकः ।
अधरच्छदाऽऽवृतरसाम्रसत्फलं
ग्रहणेच्छुराभवमिवावतिष्ठते ॥८॥

तव दोर्लते फलसमृद्धिमागते
कलिताङ्गियष्टिपरमे सुशाखिताम् ।
अधिगम्य चाप्य सुरभेः सुमित्रतां
लभते सुखं हि मनुजः सुसङ्गतः ॥९॥

अभिभूयते न खलु सा कदा पिकै-
रपि धातृकारणमलं सविभ्रमा ।
न च कीलमध्यगमना सचेतना
तव नाभिरीतिरपरा विलोक्यते ॥१०॥

प्रमदे ! रथस्य तव चाखिलैर्बुधैः
सदृशीति नाभिरभिवर्ण्यते यतः ।
धृतदेहमध्यरथपादमध्यके
नहि धातृनिर्मितिविधौ विचक्षणा ॥११॥

उदरं कृशोदरि ! तवातिसुन्दरं
जलराशिवत् प्रमितिमध्यराजितम् ।
कृशतां तथापि भजते न चोत्तमः
स्मयतामुपैति बत वृद्धिमागतः ॥१२॥

सुकटे ! विधिः प्रथमभाग एष ते
चरमोऽस्त्ययं मनुजशैलवत् कटः ।
रचितो मयेति कथयंस्तनोस्ततः
समतां भजेत न कलिं सुलग्नकः ॥१३॥

वितताक्षि ! पृष्ठममलं विधिः समं
फलकं सुरीढककलं विनिर्ममे ।
शुशुभे तवाङ्गरचना हि यत्र वै
वसतीह वेणिमिषतो दिदृक्षया ॥१४॥

—मञ्जुभाषिणीच्छन्दः ।

जित्वाऽखिलं जगदिदं प्रमदाबलेन
जङ्घे उभे तव चकार मधुप्रियोऽयम् ।
स्तम्भौ जयस्य निजनामयुतौ मृगाक्षि !
वस्त्रैर्जुगोप जटिलस्य भिया च मन्ये ॥१५॥

पादाविमौ तव विघूर्णितलोचने द्वौ
कृष्णादिकामिसुरवर्गनतौ प्रवक्तः ।
मन्ये सुनूपुररवेण जमत्त्रयाय
नो वां नमन्तु किल संसृतिदुःखहेतुः ॥१६॥

एवं ते गात्रयष्टिर्जगदभिलषिता वर्णितेयं यथार्था
पूर्णालङ्कारवर्गैर्विशदरसवती विक्षिपन्ती कटाक्षान् ।
केषां केषां जनानां न भवति सुखदा कूपिकेवामृतस्य
लोके स्वर्णाकृतिर्वा मरकतहरिताद्यैरुपेतेव रत्नैः ॥१७॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथ-
माहात्म्ये महाकाव्ये प्रभावत्यङ्गोपाङ्गविभाग-
वर्णा(र्णना)त्मकोऽष्टमः सर्गः ॥८॥

## प्रावृट्कालवर्णनात्मको
## नवमः सर्गः ।

भद्रे ! मनो मे परिभोगसङ्गं
वावांछि नो ज्ञानविशुद्धिशक्त्या ।
जानन् जनः को गरलं हि भुङ्क्ते
त्यक्त्वाऽमृतं मोक्षफलाभिलाषी ॥१॥

पित्रोः प्रमोदाय तवानुरोधात्
संवृत्य चित्तं मुनिवद् यतिष्ये ।
भोगोपभोगेषु मनः प्रवृत्ते
पापप्रवृत्तिः खलु वर्धतेऽत्र ॥२॥

वर्षागमोऽयं कवते सुतारे !
सोत्कण्ठमावां घनगर्जितेन
भोगान् यथेच्छं लसतं मनोज्ञान्
सच्चातकप्रीतिसुखप्रदेन ॥३॥

त्वं पश्य मेघं शितिकान्तिरम्यं
विद्युल्लतापूरितमध्यभागम् ।
भास्वद्बकश्रेणियुतं यथैतं
पीताम्बरे हैमवती तटस्थम् ॥४॥

श्रीलास्यलीलाविहितप्रयासा
विस्तारितास्तत्र बलाकवर्गाः ।
भोगेच्छुभिः कामरसाकुलाभी
रामाभिराकीर्णविहारमार्गाः ॥५॥

भाग्योदयेनैव मयूरपङ्क्ते-
　　स्तद्दर्शनं जातमिति प्रमोदात् ।
केकाभिरेवं प्रविभाषमाणा
　　नृत्यन्ति वामाक्षि ! मयूरसंघाः ॥६॥ युग्मम् ॥

प्रेमाकुला भर्तरि दूरदेशात्
　　समागते पूर्णमनोरथाली ।
वेषं चकारेति विकस्वराङ्गी
　　नीरप्रवाहेण वसुन्धरेयम् ॥७॥

नीलाङ्कुरव्याजनिबद्धचोला
　　सद्बन्धुजीवादिपिनद्धरत्ना ।
गङ्गादिहारावलीशोभितश्री-
　　र्वानस्पतानेकविचित्रवस्त्रा ॥८॥ युग्मम् ॥

अभ्रावलीं पश्य गिरिं स्पृशन्तीं
　　पृथ्व्याः कुचं स्वीयकरालिमेव ।
स्प्रष्टुं घनो भोगफलाभिलाषी
　　संभाव्यते लक्षणतश्चलाक्षि ! ॥९॥

दुर्भिक्षरात्रिंचर एष नूनं
　　विश्वं समाभोक्ष्यत चारुमूर्ते ! ।
यद्येष नभ्राट् परमोपकारी
　　[illegible]

जन्म-स्थिती नौ परिवर्द्धयस्व
मण्डूकसंघोऽत्र नभोऽम्बुपश्च ।
आसारवृन्देन तडिद्वतो द्वौ
विज्ञप्तिमेवं वदतो रवेण ॥११॥

सालः कदम्बः ककुभश्च रम्भा
सन्मालती केसरकस्तथैते ।
वीक्ष्योदयं सुन्दरि ! धूमयोने–
र्गृह्णन्ति पुष्पाणि फलानि वृक्षाः ॥१२॥

ऐन्द्रं धनुः पश्य घनेन सार्कं
मुक्तं क्षितौ दुश्च्यवनेन मैतम् ।
रुन्धन्ति गच्छन्तमवग्रहा मे
ज्ञात्वा प्रभोः साध्वसकम्पिताङ्गाः ॥१३॥

—इन्द्रवज्राच्छन्दः ।

पृथ्वीरूपं भवति सुखदं भूस्पृशामभ्रपङ्क्तौ
वर्षन्त्यां भो सुदति ! रमणीवृन्दमेतच्च पुर्याम् ।
हर्म्यश्रेणौ सुरतरसिकं गायति प्रेमवाक्यं
स्मारं स्मारं रसिकरमणप्रीतये प्रेमपात्रम् ॥१४॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये
प्रावृड्वर्णनात्मको नवमः सर्गः ॥

## शारदकालवर्णनात्मको
## दशमः सर्गः ।

भुवः प्रमोदं च विहाय बाढं
हसन् विहायासितभावमुच्चैः ।
क्षणाच्च दुर्भिक्षरिपुं विहत्य
जयश्रियं श्रीमुदिरो बिभर्ति ॥१॥

रसातिमात्रेण मलं वहन्त्यो
गताः समुद्रं ह्यथ ता विशुद्धाः ।
समेत्य कालं शरदा समिद्धं
यथाऽविनीता इव धर्म्मभावम् ॥२॥

सितच्छदा मानसमात्मनीनं
विभुज्य शुद्धानि सरांसि भेजुः ।
स्ववारटानां मकरन्दवृन्दं
मुखे मुखे नैव ददुश्च रागात् ॥३॥

प्रशस्यसस्यानि कणव्रजानि
सुपक्वसद्गन्धमनोहराणि ।
विरेजिरे लोकमनोरथेन
प्रवर्धमानानि यथा प्रदेशम् ॥४॥

घटोघ्न्य एताः परिपुष्टदेहाः
पयःप्रवाहं वितरन्ति गावः ।

तथा महिष्यश्च पयोदमाला
इव प्रसन्नाः शरदः प्रसङ्गे ॥५॥
बलाहकोऽयं च वसुन्धरेय-
मुभाविमौ नः पितरौ भवेताम् ।
विमृश्य सालिप्रकरा विदध्यु-
र्भुवस्तले केलिभरं पतन्तः ॥६॥
दिवाकरो रात्रिकरश्च यत्र
प्रदीप्यतस्तीक्ष्णसुशीमपादैः ।
सदम्बुजश्रेणिविकाशकारी
रविः शशी चौषधिवृद्धिहेतुः ॥७॥
परस्परं प्रीतिपरा युवान-
स्तथा युवत्यो रसकेलिभाजः ।
दिवीव गीर्वाणसुराङ्गनौघाः
जानन्ति नोऽनेहसमियूतन्ते ॥८॥
लतावली यत्र फलानि वृद्धिं
नयत्यसौ शुक्तिरिवाम्बुराशौ ।
सितोऽसितत्वं परिहृत्य काशो
विहाय कर्मौघमलं यथाऽऽत्मा ॥९॥
नभस्तलं श्वेतपयोदपङ्क्ति-
र्विभाति रम्याङ्गिसमाश्लिषन्ती ।
सितांशुका श्रीर्मदनातुरेव
हरेः समालिङ्गनमाचरन्ती ॥१०॥

त्वया कृतं भव्यमिदं जनस्य
　　घटोद्भवो नाम मुनिर्घनस्य ।
क्षुतृप्तिमात्रा भवतीह भुक्ति–
　　रुदीर्य याहीति खमुद्गतोऽयम् ॥११॥

कठोरतां भर्तृवियोगभावा–
　　दवाप भूः शोषमलाच्च पङ्कः ।
दिशश्च रक्ता मुनिमैक्ष्य कोपा–
　　दिवाभ्रमेतन्नयते विदेशम् ॥१२॥

——उपेन्द्रवज्राच्छन्दः ।

इत्थं पूर्णमनोरथः कृतजनानन्दः प्रिये ! शारदः
　　कालः क्रौञ्चकुलं विदेशि सुखयन् सस्योत्करैर्निर्भयम् ।
तस्थौ प्रीतिपरायणो जनगणैः प्रोद्गीयमानः सुखं
　　यस्मादिष्टविधायको गुणिजनः सर्वत्र संपूज्यते ॥१३॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धि–
पार्श्वनाथमाहात्म्ये महाकाव्ये शारद–
कालवर्णनात्मको दशमः सर्गः ॥

## हेमन्तकालवर्णनात्मक

### एकादशः सर्गः ।

अथो चकोराक्षि ! हिमोद्गमोऽयं
यत्र प्रभूतः किशलापहारी ।
रुद्रेति नाम प्रवदन् यथार्थं
समेति रुद्रः समयः प्रमादी ॥१॥

अगारमध्यं हिमपीडिताङ्गो
लोको विहायाशु बहिःप्रदेशम् ।
योगीव सेवेत परीषहेण
नितान्तसंसारसुखाभिलाषी ॥२॥

तुषारवीर्यप्रहताङ्गवीर्या
दर्वीकराः शेषपतिं श्रयन्ते ।
पाताल्लोकेश्वरमस्तवीर्या
यथा सुरः दैत्यगणैर्दशार्हम् ॥३॥

विलासिनीनामधरप्रवालं
दृष्ट्वा हिमप्लुष्टमवाप्तकोपाः ।
कुर्वन्ति तापं परितः कृशानो-
र्विलासिनो नाशकृते हि तस्य ॥४॥

वराङ्गनाश्चम्पकतैलपूरै-
रङ्गस्य संमर्दनमाचरन्त्यः ।

दम्भिन् प्रयाहीति तुषारचेन्नो
लभस्व मई कथयन्त्यभीक्ष्णम् ॥५॥
हिमोज्ज्वलैहीरगणैर्गुणौघैः
संपीडितैरेव विभूषिताङ्गाः ।
कस्तूरिका-कुङ्कुमरागलिप्त—
कपोलयुग्माः पुरयोषितोऽमूः ॥६॥
अनेकधूपैः सरसैर्मनोज्ञैः
संधूपितक्षेत्रलताः सखेलम् ।
तासां शरीरं परिरब्धुमिच्छु—
रपीक्षितुं नैव मलं तुषारः ॥७॥ युग्मम् ॥
महदभुतं साधु चिकीर्षवस्ते
हर्म्येषु संधूपितमध्यकेषु ।
दोषां च तुर्यामिमितामनैषु—
र्मुहूर्त्तमात्रेण विलासिनोऽमी ॥८॥
—उपजातिच्छन्दः ।
इत्थं मनोज्ञसुरतोत्सवमाततानाः
हेमन्तकालिकमदभ्रविनोदभाजः ।
स्वर्गेऽप्सरोभिरिव केवलमादितेयाः
स्त्रीभी रसन्ति पुरि भोगरसं युवानः ॥९॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफल—
वर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये
हेमन्तकालवर्णनात्मक एकादशः सर्गः ॥

## शिशिरकालवर्णनात्मको
## द्वादशः सर्गः ।

शीतसंततिरुपैति वृद्धितां
दुःस्त्रिलोकपरिपीडितोत्सुकाः ।
यत्र भोगिपुरुषाः प्रमोदिनः
पुण्य-पापफलमेतदक्षयम् ॥१॥

सैष काल इति भव्यमण्डलीं
भाषमाण इव पक्षिनिक्वणैः ।
एति सुन्दरि ! निजोन्नतिं परां
दर्शयंश्च जगतः समं ततः ॥२॥

पत्र-पुष्पधनमैक्ष्य सुन्दरं
दुष्टभूप इव पौरवासिनाम् ।
यः प्रिये हरति सर्वशाखिनां
कुर्वतां रुदितमण्डजस्वनैः ॥३॥

इक्षवो रसनिषेकशालिनो
भूरिवाटकसमृद्धिहेतवः ।
पौरलोकसमुदायशोभिनो
वृद्धिमापुरिह पश्य सर्वतः ॥४॥

बाह्यमेव विविधं सुखैषिण
आद्रियन्त इनमण्डलं तथा ।

अह्नि भास्वरतरं विभावसुं
स्त्रीजनं च निशि कालवेदिनः ॥५॥
कामिनीः कमनवह्निपूरिताः
कामिनोऽपि परितो विभावसुम् ।
एक एव शिशिरो जिनातितान्
काल एव बलवान् प्रतीक्ष्यते ॥६॥
योषितोऽधरमलं व्रणाङ्कितं
निर्व्रणं खलु विधातुमक्षमाः ।
दृश्यतेऽह्नि शिशिरेण यामिनी
कालमाप्य रमणेन सस्पृहम् ॥७॥
भूषणानि सिचयो न चेद् दिवा
भर्तृयोग इतरो न चेन्निशि ।
योषितां वपुषि कां न कां शठः
सैष एष कुरुते विडम्बनाम् ॥८॥
सत्यमेव वचनं हि मन्यतां
भर्तृयोगरहिता विलोक्यताम् ।
दुःखपुरमृतुभिर्विधीयते
सैव वेत्ति हरिणाक्षि ! वाजिनः ॥९॥
—रथोद्धताच्छन्दः ।

इत्थं सैषस्तरुविरहिणी पुण्यहीनान् विहाय
सर्वानन्यान् सुखयति जनान् भोगसंतोषपोषः ।

गायद्गीतः प्रमुदितजनो याति संप्राप्तलीलो
नूनं स्थाता न भवति चिरं कोऽपि संसारवासी ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचितेश्रीफलवर्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये शिशिरकाल-
वर्णनात्मको द्वादशः सर्गः ॥

## पार्श्वनाथ—प्रभावतीक्रीडावसन्तकालवर्णनात्मकः
## त्रयोदशः सर्गः ।

पार्श्वकुमारमथो वनपालो
वक्त्यभिनम्य कृताञ्जलिरेवम् ।
नाथ ! वनं तरुराजि विराजि
पादरजोभिरलंकुरु पूतम् ॥१॥

रम्यवचो रमणीपरिवार—
स्तस्य निशम्य वनं स वसन्ते ।
नृत्यति सुन्दरनर्त्तकवृन्दे
गायति गीतगणे समियाय ॥२॥ युग्मम् ॥

कुङ्कुमपुष्पनिषेकसुगन्धि
नीरजनीरभरैः परिपूर्णम् ।
कुण्डमवाप्य युवा युवतीभिः
क्रीडति दत्तपरस्परहस्तः ॥३॥

पुष्पबृहत्स्रजमात्मकरेणा—
दाय युवा युवतीर्दधतीः स्वाम् ।
तर्जति ताः परिरभ्य ततस्तं
शासति वः किमहो करवाम ॥४॥

पद्मदलेन निमील्य ततोऽसा—
वक्षियुगं रमणो रमणीनाम् ।
चुम्बति पद्मसुगन्धि मुखं च
केलिभरं विविधं स विधत्ते ॥५॥

मण्डपमेत्य वसन्तसदक्षं
वेषमुपेत्य च सार्द्धममूभिः ।
पुष्पितमाम्रतरुं स विलासी
तिष्ठति शिष्टमतिर्युवतीभिः ॥६॥
शाखिनमेतमभीप्सितसातं
कोकिलयुग्ममतीवविलासि ।
यत्र ददाति मुखेन मिथोऽदो
मञ्जरिमाप्तसुखामिह पश्य ॥७॥
एष विधाय तरोः किल रूप-
मस्य विभाति वसन्त इलायाम् ।
भूप इवाण्डजसेवकवर्गै-
र्गीतयशःफल-पत्रसमृद्धिः ॥८॥
पुष्पलिडागतमार्गणसंघा–
वाप्तरसार्थचयः स्मररूपी ।
गुञ्जदतुच्छकसारघदासी–
वृन्दविराजितभूरिनिवासाः ॥९॥
अर्जुन-बिल्व-कुरण्टक-नीपा
क्षीवपलाश-सुवेतसयोधः ।
साल-पियाल-मधुद्रुम-मन्त्री
फेनिल-पीलु-महातरुदूतः ॥१०॥
बादरसस्यवनस्पतिवल्ली–
कोशधरोऽद्भुतशक्तिरशोकः ।

सैन्यपतिश्च जटी वरछत्री
यस्य कलिः किल कोट्टपतिः स्यात् ॥११॥
अन्यतरूच्चय एवमशेषो
यस्य भवेत् परिवारविशेषः ।
स्त्रीरतिरेव सुतश्च विनोदो-
ऽभ्यर्चति यं जनता द्रवदम्भात् ॥१२॥
पञ्चभिः कुलकम् ।

वायुरयं शिशिरश्च सुगन्धि-
र्मन्दगतिर्भवतीह मरालः ।
केलिभरोत्थकुलीनसविप्रुट्
मौक्तिकमत्ति विलासिजनानाम् ॥१३॥
रक्तपटौघविभूषितदेहाः
प्रीतिपरास्तरुणाश्च तरुण्यः ।
भान्ति वसन्तमवाप्य मिथः स्वां
रागमितिं सुधियां कथयन्ति ॥१४॥
नूतनचूर्णरजःपरिपूर्णं
लोचनयुग्ममिदं तरुणीनाम् ।
मैत्यरुणं किल कामशिखीदं
वक्ति जनं विजितं समविश्वम् ॥१५॥
कुङ्कुमलिप्तकुचौ युवतीनां
हारयुतौ मृगनाभिसुमध्यौ ।

शेषजिनौ मदनश्च समेता
द्रष्टुमलं सुरभेः श्रियमेतत् ॥१६॥
बाहुयुगं रमणी-रमणानां
तत्र युतं परिभाति जनानाम् ।
शम्भुरयं विरजःपरिलीनो
द्रष्टुमनाः सुरभिं समियाय ॥१७॥
योषितमात्मबलेन युवाऽन्यः
कन्दुकवत् परिगृह्य विमुग्धाम् ।
स्कन्धतटे परिरक्षति नीत्वा—
ऽऽमस्तकभिः परितोषमियर्तु ॥१८॥
एवमनेकविधां रसकेलिं
पश्य विवेकिनि ! कामिजनानाम् ।
प्राप्य वसन्तमनेहसमस्मिन्
पुष्पमियर्त्ति समं तरुवृन्दम् ॥१९॥
शाखिपलाशगणैः कुसुमैर्वा
गुच्छफलप्रकरैर्बहुवर्णैः ।
कामिजनस्य च केलिभिरच्छा
भूः सुरभेर्नहि कस्य सुखाय ? ॥२०॥

—दोधकच्छन्दः ।

इत्थं क्रीडां सुरभिसमयं प्राप्य पार्श्वः कुमारः
कृत्वा सार्धं युवतिभिरलं चैत्यमासाद्य चैकम् ।

दृष्ट्वा नेमिं विमुखमनसं राज्य-राजीमतीषु
वैराग्यं सोऽलभत परमं चित्रितं भित्तिदेशे ॥२१॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये पार्श्व-प्रभावतीक्रीडावसन्तकालवर्णनात्मक-त्रयोदशः सर्गः ॥

## ग्रीष्मकालवर्णनात्मकः
## चतुर्दशः सर्गः ।

प्रिये ! सुगन्धिः प्रसरत्सुपल्लवो
भ्रम[द्]द्विरेफोत्करशब्दसुन्दरः ।
कुनालिकालापजयारवप्रभुः
महद्रसादानफलप्रसूतिकृत् ॥१॥

रविप्रतापापहृतौ विचक्षणः
कठोरवातात्तफलप्रसिद्धिभाक् ।
अनोकुहाक्षीणकुलावतंसको
निदाघकाले किल सप्तपर्णकः ॥२॥ युग्मम्॥

जनस्य तापं वितनोति सर्वतो
निदाघमेव प्रकटीकरोति यः ।
जलस्पृहां वर्धयते मुहुर्मुहु-
र्निदाघकालो रमणीशरीरवत् ॥३॥

तुषारसंचारहृतप्रभाचयो
रविः सकोपः शिशिरेषु वस्तुषु ।
जलादिषु स्वीयकरप्रचारतो
निवर्तयामास स शीतलश्रियम् ॥४॥

तदा शशी ज्ञातहिमप्रमापणो
विभावरीवस्तुचये कलाभरैः ।

स जीवयामास तुषारसन्ततिं
सखा हि काले रतये विधीयते ॥५॥
समीरणोऽपीह रविप्रभागतः
समुष्णभावं यतते पुनः पुनः ।
परानुवृत्तिं श्रयते बलच्युतो
जिजीविषुः कीर्तियशःपराङ्मुखः ॥६॥

निदाघकालात् परितो बिभीषवो
यमस्वसारं कमलं स्वरापगाम् ।
हरिर्विधाता जटिलश्च देवताः
समाश्रयन्ते स्म सुखैषवः प्रिये ! ॥७॥

जलाशयैर्मेघवियोगयोगतो
रसा रसाभावगता कृशाऽभवत् ।
स्वभर्तृपर्यागमनोत्सुका सती
वियोगिनी स्त्रीव दिनान्यवाहयत् ॥८॥

स्त्रियो युवानश्च दिनानि चन्दनैः
सुशीतलैर्व्यञ्जनजातवायुभिः ।
सुगन्धिभिः सुन्दररत्नचन्दनै-
र्नयन्ति दीर्घाणि सुखेन सद्गते ॥९॥

विभावरी चन्द्रमसः सुधारसं
प्रपातिनः शीतलचन्द्रिकाभरैः ।

नयन्ति रामा सुरताभिलाषिणो
नरास्त्रियामा अपि ताः क्षणेन ॥१०॥
—वंशस्थछन्दः ।

इत्थं षण्णामृतूनां नृपतिकुलभवे भोगसाताभिलाषी
लोकः प्रोन्मत्तचित्तो गमयति नृभवं धर्मकर्माप्रसक्तः ।
यः कश्चित् स्याद् विवेकी स खलु नरभवं धर्मकृत्यं वितन्वन्
साफल्यं संविधत्ते भवति शिवसुखं प्राप्य सिद्धः क्रमेण ॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते फलवर्द्धिपार्श्वनाथमाहात्म्ये
महाकाव्ये ग्रीष्मकालवर्णनात्मक-
श्चतुर्दशः सर्गः ॥

## सूर्यास्तसमयवर्णन-चारित्र-केवलज्ञानोत्पत्ति-
## वर्णनात्मकः पञ्चदशः सर्गः ।

पार्श्वं वदन्ति विबुधाः परं वच-
स्तीर्थं प्रवर्त्तय विभो! शिवप्रदम् ।
दानं च वार्षिकमदात् ततो जिनो
भूमण्डलं सकलमस्तु सत्सुखम् ॥१॥

पौषाद्यपक्षभवमानसत्तिथौ
दीक्षां जिनः शममयीं ललौ स्वयम् ।
सिद्धान् प्रणम्य शिरसा महोदयं
देवेन्द्रचक्रविहितोत्तमोत्सवः ॥२॥

निःसङ्गनिर्ममनिरामयो लयी
निर्दम्भकामरहितो निरञ्जनः ।
निर्मोह-लोभरमतापराङ्मुखो
भूमौ विहाररचनां चकार सः ॥३॥

सूर्योऽपरां दिशमुपैति काश्यपीं
कृत्वा मयूखविशदामनेकशः ।
मातुः स्थितिं शिशुरिवाशु दैवसीं
केलिं प्रमोदवशतो दिदृक्षया ॥४॥

सर्वा दिशः प्रमुदिता इवारुणा
जाता बहिः प्रकटयन्ति रागताम् ।

लोके यतो रविरसावहर्निशं
तोषं तनोति विनयी स्वमातृषु ॥५॥
वत्सा मिलन्ति सुरभीरसेच्छवः
स्थानं श्रयन्ति पथिकाः पतत्रिणः ।
नीडं च खेदमपहन्ति कर्षकाः
ध्वान्ता रसां मलिनयन्ति चाभितः ॥६॥
शिष्टा वृषं तदितरा अपुण्यकं
कुर्वन्ति कौशिककुलं द्रवप्रियम् ।
कोकश्च युग्मविरही न ही विधे-
र्दुःखं प्रयासि हृदयं कठोरवत् ॥७॥
मर्त्या रमाश्च पशवो निशाचरा
जल्पन्ति शब्दमपटुं कटुस्वरम् ।
मन्येऽर्कसूनुरवनीं भयाकुलां
कुर्वन् प्रहासवशतोऽभिनृत्यति ॥८॥
एतादृशोऽस्तसमये विभावसोः
कर्मारिघातविहितोद्यमः प्रभुः ।
ध्यानाध्वरक्षितमनास्तपश्चयं
चक्रेऽभिभावितभवस्वरूपकः ॥९॥
मार्गः श्लिष्टं जिनतनोस्तरोरिवा-
ऽऽकर्षीत् करी करपुटेन चानतिम् ।
सिंहस्तथैव न पुनः पराभवं
सर्पस्तनोति परिवेष्टमङ्गके ॥१०॥

केकां मयूरनिवहोऽपरे वय–
स्तिष्ठन्ति गात्रनिचये पृथक् पृथक् ।
तिर्यग्गणः शिशुरपि प्रभीच्युतो
हस्तं विलङ्घ्य रभसा स्म रोहति ॥११॥

केलेर्गृहं प्रभुरभूद् वनौकसां
योगीन्द्रमूर्तिरपवर्गसाधकः ।
मोहक्षयं गुरुतमोऽष्टकर्मसु
प्राप प्रभुश्च भजते स्म केवलम् ॥१२॥

–ललिताछन्दः ।

देवाः सर्वे समीयुस्तदनु जिनपतिं वीक्ष्य लब्धप्रमोदा–
श्चक्रुस्ते रीतिबद्धा रजत-कनक-सद्रत्नवप्रत्रयं च ।
स्वामी धर्मप्रपञ्चं स्ववचनरचनाविस्तरं संबभाषे
लोकाः सर्वेऽपि धर्मं यति-गृहिविभवं चाद्रियन्ते
स्म सम्यक् ॥१३॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये सूर्यास्तसमयवर्णन-चारित्रकेवलज्ञानोत्पत्ति–वर्णनात्मकः पञ्चदशः सर्गः ॥

[ १६ ]

## सर्वज्ञगुणवर्णनात्मकः
## षोडशः सर्गः।

प्रभो ! जय विश्वविदम्बुजकल्प !
विनिर्जितमोहमहीपतिजल्प ! ।
प्रमालय मालय धर्मधुरीण !
शमोदय ! मोदय तामसहीन ! ॥१॥

अनन्तचिदागमदागमदान्त !
विशाल कृपाल शिवाचलकान्त ! ।
निरीह निराश्रय संवरशुद्ध !
रसोज्झिततत्त्वरसैकविबुद्ध ! ॥२॥

अलक्ष सुलक्षण पापविपक्ष !
गमागमनाम विरामसपक्ष !
जिताजितवाद कुवादिविलक्ष !
नयानयभेदविभासनदक्ष ! ॥३॥

रसारसभावविशुद्धिविरक्त !
सदाऽभयदान रसायनसक्त ! ।
चलाचललोकविलोकनसार !
परापरशासनलब्धविचार ! ॥४॥

जरा-मर-रोगकठोरनिदाघ-
निवारणदारुणशीतलमाघ ! ।
समासममार्गविचारनिषेक !
समीहितदानवितानविवेक ! ॥५॥

जगत्त्रयपावन धर्मनिदान !
निदाननिदानतपोत्थनिधान ! ।
कृपापर पापरताहितलोक !
भवार्णवतारक निर्गतशोक ! ॥६॥

त्वमीप्सितकामघटः प्रकटोऽत्र
करोषि सुखं जनताजिन यत्र ।
नमस्यति तत्र भवन्तमनन्त–
मनुत्तरमूर्तिधरं हि भदन्त ! ॥७॥

अतोऽथ जिनेश्वरतीर्थममुत्र
सुवृत्तमभीप्सितदं सुखसत्त्व ! ।
समेति जनप्रकरोऽत्र करोति
समुन्नतिमाशु नतिं वितनोति ॥८॥

यदिच्छति वस्तु जनः सुमतीश !
सुदृष्टमदृष्टमनन्तमधीश ! ।
त्वमेव तदैव ददासि विभासि
यशःप्रकरेण नतं किल पासि ॥९॥

इत्थं स्तुतः पार्श्वपतिः सुरेन्द्रै-
र्वप्रत्रयस्थो मुनिवृन्दयुक्तः ।
सद्भूतकैवल्यगुणैस्तनोतु
कल्याणमालां परितो विशालाम् ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये
महाकाव्ये सर्वज्ञगुणवर्णनात्मकः
षोडशः सर्गः ॥

## सम्मेतशिखरवर्णन--वनवर्णन-सागरवर्णन-श्रीपार्श्वनिर्वाणगमनवर्णनात्मकः

### सप्तदशः सर्गः ।

भूमौ पार्श्वपतिर्विहारविधिना लोकान् प्रबोध्य स्वयं
वाग्भिर्विश्वपरोपकाररसिकः सम्मेतशैलाश्रमे ।
आयाति स्म मुनीन्द्रदैवतकृतासेवः परार्थप्रियो
वर्षाऽनेहसि कृष्णवारिद इव प्रह्लादयन् वृष्टिभिः ॥१॥

—शार्दूलविक्रीडितम् ।

वृक्षा लसन्ति फल-पुष्पसमृद्धिमन्तः
सन्नागरा इव विचित्रविजातिभाजः ।
शुक्लप्रभूतसुशिलागृहपङ्क्तिवासाः
पत्रालिवस्त्ररचनापरिशोभमानाः ॥२॥

—वसन्ततिलका ।

व्रततिप्रमदा लसिताङ्गभराः
कलकूजितकोकिलभृत्यभृतः ।
मृग-सिंह-गजादिपशुप्रलसत्-
परिबर्हयुताः सरसा विरसाः ॥३॥

—त्रोटकच्छन्दः ।

सूर्यरश्मिर्दिवानोकुहान् सर्वतो
नागरानेव संवर्द्धयंस्तिष्ठति ।

नीरसा नीरसाहारदानक्षयात्
केलिकर्मक्रियायोगसंपादनात् ॥४॥

—स्रग्विणीछन्दः ।

निशायां निशानाथतापः सुशीमो
नगान् नागरानेव वृद्धिं नयेच्च ।
सुधावर्षणेन प्रतापापहाच्च
कलाकेलिसंवृद्धिहेतोऽस्तमोहा ॥५॥

——भुजङ्गप्रयातम् ।

भवति काननमदः प्रमोदभूः
पुरजनस्य शिखरी विशेषतः ।
घनघनो भुवि यथैकतः शुभो
विशदवायुरपरः प्रशस्यते ॥६॥

——प्रियंवदाछन्दः ।

उपत्यका गिरेर्वने न राजते
समन्ततः सुवर्णपञ्चकेन वै ।
वशेव पञ्चवर्णशुद्धशाटिका
विराजितारुणाच्छगैरिकाञ्चिता: ॥७॥

——पञ्चचामरछन्दः ।

गिरिमेनमभ्रममरावलीनतं
पयसा विशोध्य नितरां समर्चते ।

पवनोऽपि शुष्कतृणकाष्टशोधनात्

किरणोऽपि नित्यमुदयाद्रिमागतः ॥८॥

—मञ्जुभाषिणीच्छन्दः ।

चन्द्रो निशायां गगनस्थितोऽपि

ज्योत्स्नाभरेण प्रतिपूर्णमूर्तिः ।

कर्पूरकल्पेन करप्रचार–

रीत्येव संपूजयते गिरीन्द्रम् ॥९॥

—इन्द्रवज्राछन्दः ।

गिरिं जलं निर्झरपूरकूटान्

निषेवते स्वीयजडत्वहानिम् ।

चिकीर्षुसच्चामरपङ्क्तिमच्छा–

मधः पतद् वा वितनोति सम्यक् ॥१०॥

—उपेन्द्रवज्राछन्दः ।

विभावसुर्यं भजते सुतेजाः

धूप-प्रदीपादिविधौ पटिष्ठः ।

रक्ष्या जलान्मे किल दाहशक्ति–

स्त्वयेति विज्ञप्तिपरो बिभीषुः ॥११॥

—उपजातिछन्दः ।

यत्र पूतनिधयः पदे पदे

भान्ति कान्तरुचयो निधीश्वरः ।

ढौकनं परिनिधाय सेवते

यं गिरिं निधनहानिहेतवे ॥१२॥

—रथोद्धताछन्दः ।

सिद्धगणो गृहभव्यगवाक्ष-
श्रेणिसदक्षगुहासु विलासी ।
क्रीडति हस्तगृहीतविपञ्चि-
र्गायति यत्र च गीतकुलानि ॥१३॥
—दोधकच्छन्दः ।

अधित्यका यत्र सुपीठभक्तिभि-
र्विराजतेऽत्यन्तसमासु रत्नभूः ।
लसन्ति दिव्याभरणामराङ्गनाः
परस्परं प्रीतिरसायनप्रियाः ॥१४॥
—वंशस्थच्छन्दः ।

जैनेन्द्रचैत्यरचना मनोरमा
घण्टारवप्रथितकीर्तिमण्डलाः ।
बिम्बावली रविकरप्रसङ्गतो
यस्यां विभाति सुमनोमनःप्रियाः ॥१५॥
—ललिताछन्दः ।

नगात् सरितः प्रभवन्ति यतो-
ऽच्छतरा जलराशिपतिं विभजन्ति ।
रसाधिकमात्मभवं सफलं च
नयन्ति सुनायकमध्यमुपेत्य ॥१६॥
—मौक्तिकदामच्छन्दः ।

तदनु निजवशानां भोगयोगं प्रपद्य
स्वरसमधिकमल्पं फेनकम्बद विमुक्त

श्री सोमचंद अतिभद्र जैनज्ञान

वह्निरिति वदति स्म प्राणभाजां हि गर्जन्
सुकृतफलमदो मे संपदः पश्यताच्छाः ॥१७॥
—मालिनीच्छन्दः ।

नगाः सर्वे येऽमी भुवनविदिताः पुण्यनिधयः
हिमप्रस्थाद्यास्ते मम सुरसरिन्मुख्यसरितः ।
कलत्रत्वेनैता विदितगुणराशेर्धृतिमतः
प्रमुञ्चन्ति प्रीताः प्रतिदिनमलं ढौकनमिव ॥१८॥
— शिखरिणीच्छन्दः ।

रत्नस्तोमः प्रमितिरहितो वाञ्छितार्थप्रदाता
पुत्रश्चन्द्रो ग्रहपतिरयं राजते सुप्रकाशः ।
कृष्णः शेते स्थितिमुपगतो मे शरण्यस्य जीवा
मत्साद्या ये सलिलरतयः प्रीतिभाजो रमन्ते ॥१९॥
— मन्दाक्रान्ताछन्दः ।

अम्भःश्रेणिं मदीयां प्रमुदितमनसो धूमयोनिप्रपञ्चा
लायं लायं यथेच्छं समुदयधरणीपीठमुज्जीवयन्ति ।
वृक्षाः सर्वे फलन्ति प्रसृमरविभवा नालिकेरादयो ये
मामङ्गीकृत्य नित्यं विमलतरयशो गीयते भो ममेति ॥२०॥
—स्रग्धराछन्दः ॥ चतुर्भिः कलापकम् ।

अतः परमहीनगाद् मुनियुतो गिरिं प्राप्तवान्
विहाय सुरपूजितो वनमदो जनालङ्कृतम् ।
विधूय समस्तावशान्निखिलकर्मकारागृहं
बभूव भगवांस्तदा सकलदुःखविध्वंसनः ॥२१॥
—पृथ्वीछन्दः ।

जिन-शिववशा चिद्रूपं त्वां शरीरविवर्जितं
विमलमरसं शान्तास्वादं कृतापररक्षणम् ।
सरसनभसः शुक्लाष्टम्यां तिथौ रमणं व्यधा-
दचलमरुजं सिद्धं बुद्धं भयस्मयविच्युतम् ॥२२॥
—हरिणीच्छन्दः ।

विगतवर्णमवर्णसवर्गता
सममनल्पविकल्पविकर्त्तनम् ।
अहितमाहितमीक्ष्यमनीक्षितं
प्रशमभावितसिद्धमहं भजे ॥२३॥
—द्रुतविलम्बितछन्दः ।

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये महाकाव्ये सम्मेतशिखरवर्णन—वनवर्णन—सागरवर्णन-श्रीपार्श्वनाथनिर्वाणगमनवर्णनात्मकः
सप्तदशः सर्गः ॥

# श्रावकधर्मप्राप्तिफलाविर्भावक

## अष्टादशः सर्गः ।

जन इह सुखकामो देवराजीं निषीव्या–
ऽनभिलषितपदार्थप्राप्तिमुर्वीतटस्थः ।
भवजलधिमपारं प्राप दुःखप्रपञ्चं
प्रकृतिमलिनवृत्तेर्मोहराजस्य शक्तेः ॥१॥

तृषित इव वनालीं कण्टकाग्रप्रकीर्णां
बहुलकलुषपङ्कापूर्णनक्राकुलं च ।
स वनविधिपटिष्ठः स्नातुकामो निमग्नो-
ऽप्रमितविपुलमध्यं पल्वलं दैवयोगात् ॥२॥

तमतिगहनदुःखग्रस्तमातङ्कपातं
प्रकृतिगुणमहीनं तारकत्वं विमृश्य ।
स्वपुरहितसुखार्थी वीतरागो भवाब्धेः
प्रशमनिहितकर्म्मोत्तारयामास देवः ॥३॥

उपकृतिपरिपुष्टः शिष्टविद्याभृदेक–
स्तृषितनरमिवेक्ष्य प्रत्तहस्तावलम्बः ।
तमथ कथयतीत्थं भूय एतादृशीं नो
हितसुखपरिहीनां जातु सेवस्व मान्यात् ॥४॥

—चतुर्भिः कलापकम् ।

भवति खलु जनानां स्वार्थचित्तप्रवृत्तिः
सुहृदसुहृदसारारम्भवार्त्ता वृथैव ।

किमिति पितृवधादींश्चक्रुरर्थं विचिन्त्य
प्रखलजडधियोऽलं मोहनिद्रालवः स्वम् ॥५॥

हितमहितमपीष्टानिष्टमेतन्मदीयं
परमशुभ-शुभं वा संसृतौ नास्ति किञ्चित् ।
जिनविदितमनन्तं धर्ममेकं विहाय
स्वहृदि विनयभाजो भावयन्तीत्थमत्र ॥६॥

वचनममृतकल्पं देवदेवस्य सभ्यं
सदतिशयसुरालीमध्यमध्यासितस्य ।
श्रवणपथमवाप्य स्थास्नु यावच्छरीरं
विदितपरमभावा ज्ञातसिद्धिस्वभावाः ॥७॥

विधिविहितजिनार्चाः प्राप्तपुण्यप्रपञ्चाः
भुवनसकलतीर्थश्रेणियात्रापवित्राः ।
सुविहितमुनिपक्षासेवनालीढचित्ताः
व्यवहृतिमतिशक्त्योपार्जितानल्पवित्ताः ॥८॥

जनहितकृतिदक्षास्त्यक्तदुर्दैवपक्षाः
परसमयविपक्षादेशतो जीवरक्षाः ।
स्खलितकुमतयक्षाः श्रावकत्वेन मुख्याः
परगृहनिरपेक्षाः सातजातं लभन्ते ॥९॥

विपुलमनुजभोगांस्तेऽनुभूयाप्रमत्ता
जिनवरमतरक्ता निन्द्यकार्ये विरक्ताः ।

अतिविशदमनल्पध्यानमासाद्य चान्ते
बहुतरसुखमापुर्वासवा वासमाशु ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये
[महाकाव्ये] श्रावकधर्मप्राप्तिफलाविर्भा-
वकोऽष्टादशः सर्गः।

## देवसुखवर्णनात्मक
## एकोनविंशतितमः सर्गः

शुभश्रीपात्रं ते विपुलसुखभाजो गतभियः
पदं श्लोकश्रेणेः सवितृशततेजोऽभिभविनः ।
अगर्भक्लेशज्ञाः परमरतिसंसक्तमनसो
विभासन्ते देवाः सकलसुरदेवीपरिवृताः ॥१॥

स्थितिर्येषां पल्योपममिति गुणा यत्र लघुका
तथा दीर्घा ख्याता जलनिधिमिता पार्श्वपतिना ।
गतक्लेशा या सा परवशत्वादेशरहिता
न जानन्ते कालं बहुमपि गतं पुण्यवशतः ॥२॥

पुनर्येषां क्रीडारसपरिचयं सद्विदधतां
नदत्तूर्यव्रातं त्रिदशरमणीनृत्यमतुलम् ।
झणत्कारश्रेणीरुचिरममलं नूपुरगणं
कणद्वीणानादं परमरसभृच्छ्रोतृसुखदम् ॥३॥

मृदङ्गक्वाणौघं स्वरसमुदयं गीतरचनं
रणत्कारं स्फारं बहुलतरतालं समलयम् ।
पुराचीर्णश्रेयो विभवमखिलं यान्ति दिवसाः
क्षणप्राया दिव्यं सुखमनुपमं चानुभवताम् ॥४॥
—युग्मम् ॥

मुखं दीप्यत्कान्त्या वपुषि रचितं वीक्ष्य मरुतः
शशी किं चायं मे युवतिसमुदाये समुदितः ।
ममोल्लासं कर्तुं किमुत परिभोक्तुं समदनः
प्रसन्नां खिन्नां वा मनसि सविकल्पार्थमत्यः ॥५॥

गुणश्रेणेः पात्रं मुदितमनसो दिव्यवपुषः
कला-कौशल्यज्ञा मदनरसभावं समुदिताः ।
न याभ्यो जायन्ते विरसमनसो जातु मरुतः
सलीलं क्रीडन्त्या निधनमपि येषां स्ववनिताः ॥६॥
पुनर्येषामन्धः सरसममृतं कान्तिजनकं
सवीर्यं सर्वाङ्गप्रचयसहचारि प्रशमकृत् ।
अजीर्णा प्रीतिघ्नं सकलपरमाक्षप्रकृतिजं
परां तुष्टिं पुष्टिं जनयति सदा वा सुमनसाम् ॥७॥
पुनर्येषां कान्तान्यसित-सित-पीतैररुणकैः
सदा ज्योतिर्मद्भिः सरसशुभगन्धीनि परतः ।
सुरत्नैर्युक्तानि प्रवरभविमानानि बहुशो
लभन्तेऽनिर्वाच्यं सुकृतमतयो येषु हि सुखम् ॥८॥
पुनर्येषां शय्याः कुसुमनिकरालीढसविधाः
ककुप्सु प्रत्येकं सुरभितरगन्धैः सुनिचिताः ।
नदन्मुक्ताजालैः परिकलितभूभागपरमा
न शक्ताः केऽपि स्युर्मृदुलपरिभाव कथयितुम् ॥९॥
पुनर्येषामङ्गाभरणततिरच्छामिति परा
सनत् सर्वाङ्गीणा वपुषि परिसंसक्तविभवा ।
सुरा राश्र्च्यत्यन्तं किरणकिरणालो सुरगिरौ
प्रसक्तेवाऽक्षीणा शरदि परिवृद्धादिततमाः ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये [महाकाव्ये] देवसुखवर्णनात्मक एकोनविंशतितमः सर्गः ।

## देवसुखशक्ति-पुण्यविधानवर्णनात्मको
## विंशतितमः सर्गः ।

भूयो येषां गज-हय-रथाः पत्तयः प्रेमपात्रं
येभ्यो ज्ञेयाः सुरसदसि सदा श्लोकभाजो भवन्ति ।
भृत्यव्रातैः प्रहरणशतालीढगात्रैरुपेताः
छायाऽपीयं परिकरवतां नाभिभूयेत कैश्चित् ॥१॥

भूयो येषां प्रचुरविभवं सद्विमानेषु नित्यं
विभ्राजिष्णु प्रमितिरहितं निर्मलं दिव्यकोशे ।
दर्शं दर्शं मुदितमनसस्ते भवन्ति प्रकामं
संसारेऽस्मिन् न भवति धनाद् वल्लभं किञ्चिदन्यत् ॥२॥

येषां शक्तिः प्रकटविभवा वाग्-मनः-कायजाता
योगीन्द्राणामपि सुवचनैरप्रमेया विभाति ।
श्रावं श्रावं प्रवचनगणे वीतरागप्रणीते
धर्मे कर्तुं प्रभवति मतिः पुण्यभाजां नराणाम् ॥३॥

स्वस्थानस्था अपि विदधते चिन्तयन्तः समग्रं
सातासातं मनुजनिकरे देव-देवीगणे च ।
प्रायस्तेषां परहितकृते जायते शुद्धबुद्धि-
श्चेतोवृत्तिर्भवति च शुभा कृष्णलेशा(श्या)द्यभावात् ॥४

आप्तोत्पत्त्यादिषु सविभवा आशु शुद्धाशया ये
शुद्धात्मानः क्षितितलमुपागत्य कुर्वन्ति भक्तिम् ।
आत्मीयन्ते कलुषमतुलं घ्नन्ति चिन्वन्ति पुण्यं
प्राप्तैश्वर्याः शुचमुपगता येन कुर्वन्ति धर्मम् ॥५॥

तीर्थेशानां समवसरणेऽभ्येत्य नत्वा च नृत्यं
　　नानाभेदं परभवमिति चात्मनीनां निशम्य ।
हर्षोत्कर्षे जिनपमहिमां ये वितन्वन्ति सम्यक्
　　धन्यंमन्या दलिततमसः प्राप्नुवन्ति स्थितिं स्वाम् ॥६॥
निर्ग्रन्थानां शमरसभृतां कुर्वतां दुस्तपस्यां
　　गत्वाऽभ्यासं विदधति सुरा येऽर्चनं प्रीतिभाजः ।
श्रद्धालूनां जिनमतविदां धर्ममातन्वतां च
　　साहाय्यं श्रीप्रभृतिकरणात् कुर्वते भूमिपीठे ॥७॥
तीर्थश्रेणीं विशदमतयो यानमारुह्य गत्वा
　　नित्यानित्यां जिनगृहरुचिरामर्चयन्ति स्वभक्त्या ।
गायं गायं मधुरवचनैर्दिव्यगीतानि देवा
　　जन्म स्वीयं सुकृतवशतः पावनं ते विदध्युः ॥८॥
ह्रस्वां दीर्घां तनुमतनुकां रम्यकारम्यकां वा
　　वक्रावक्रां मनसि रचितां भीषणाभीषणां वा ।
देहे स्वीये जगति जनताश्चर्यभूताममर्त्याः
　　नानारूपां चपलवपुषो विक्रियां कुर्वते ते ॥९॥
इत्येवं ते परिणतिवशाद् दर्शनं पावनं स्वं
　　कृत्वा भोगान् स्वकृतरचितान् स्वर्गतौ चानुभूय ।
श्रेयोवृद्धेरपगतशुचो गृद्धिमप्राप्नुवन्तो
　　धर्मध्याने स्खलितमतयः कालसीमां त्यजन्ति ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये-
[महाकाव्ये] देवपुण्यशक्तिपुण्यविधानवर्णनात्मको
विंशतितमः सर्गः ॥

# चारित्रफलाविर्भाव

## एकविंशतितमः सर्गः ।

आर्यक्षेत्रे पवित्रे जिन-मुनिविहृतिश्रेयसा मोक्षमार्गे
वंशे कीर्तिप्रपञ्चे शशिकरविशदे भूरिसस्यार्थभोगे ।
जातावत्युज्ज्वलायां बहुलपरिकरैः संयुतायां त एवो–
त्पद्यन्ते पुण्ययोगान्निजकथनपरैर्भृत्यवृन्दैर्नतायाम् ॥१॥
येषां जन्मक्षणेऽभूदतुलसुखततिर्मातृ-पित्रादिवर्गे
तूर्यश्रेणेर्निनादः श्रुतिसुखजनको गीतगानप्रमोदः ।
दानं दीनव्रजानां सकलपुरि नरीनर्ति गाणिक्यमाला
एवं श्रीरुत्सवानां दिनदशकमिता शोभते स्म प्रभूता ॥२॥
पित्रादीनां प्रमोदैः कनकगिरिगुहामध्यभागस्थवल्ली–
व्रातौपम्येन बाल्यात् प्रतिदिवसमलं वर्द्धमानाः क्रमेण ।
क्रीडानेकप्रभेदे विकसितमनसो यौवनं प्राप्तवन्तः
प्रायो लोकेऽपनेतुं प्रकृतिमिह दशानां नवाऽलं मनुष्याः ॥३॥
रूपश्रीस्थानमङ्गं निखिलगुणकलाराममस्तोकवीर्यं
धैर्यप्रेक्षासमृद्धिक्षितिनयशसो भाजनं प्रेमपात्रम् ।
स्त्रीणां कौशल्यभाजां प्रहसितवदना नित्यमाबिभ्रतो ये
मन्ये कन्दर्पदेवः स्ववसतिमकरोद् यत्र रूपं विहाय ॥४॥
तन्वङ्गीहाव-भावावलिकिरणरुचीर्बिभ्रतीः स्त्रीविलासं
तुल्यं प्रीतं वयश्चानिमिषवरवशा विस्मयं कुर्वतीर्याः ।
पित्रादेशं प्रपन्ना विनयनयपरा पर्यणैषुः कुमारा
भूमौ जाताः प्रसन्ना कृतगुणमणयः काञ्चनालीर्मिलन्ति ॥५॥

एवं संप्राप्तभोगान् मनुजकृतगृहेषूच्चविस्तारवत्सु
भोजं भोजं मनोज्ञान् जनजनितसुखाः स्वैरमध्यासते ते ।
तस्मिन् काले क्षणे वाऽसुर-सुरनिकरैः स्तूयमाना जिनेन्द्रा
निर्ग्रन्था वा समेतास्त्रिभुवनहितदं धर्ममाख्यान्ति शुद्धम् ।६।।
श्रुत्वा ते च प्रबुद्धा स्मृतसुरविभवाः प्राप्तवन्तश्चरित्रं
शिष्यास्तीर्थेश्वराणां व्यपगतमदना आचरन्तस्तपस्याम् ।
धन्या एते जिनेशा भवजलनिधितस्तारयन्तीति चित्ते
वारं वारं स्मरन्तो जिनगुणव्रततीः पालयामासुरेवम् ।।८।।
शत्रौ मित्रे वराके धनवति पुरुषे भूपतौ सेवके वा
शस्त्रे वस्त्रे विवस्त्रे वसनवति तथा दुर्जनेऽदुर्जने वा ।
सातेऽसाते विघाते सममतिविभवाः सन्निपाते निपाते
संसारे कर्ममोक्षे सुखिनि गतसुखे पण्डितेऽपण्डिते वा ।।९।।
येषां काये कृशत्वं समजनि शमतावृद्धिरस्तप्रकोपा
मोहः क्षीणः समानः समितिततिरलं राजते काकनाशम् ।
नष्टा माया सलोभा सपदि निविशते पुष्टिसंतुष्टिरच्छा
शुक्लं ध्यानं समुत्थं व्यपगतकलुषं केवलं शोशभीति ।।९।।
ज्ञात्वा विश्वं समस्तं करकमलगतं वस्तुवत् क्षीणनामा-
ऽयुर्गोत्रासातसाताः शिवमचलमनन्ताक्षयं शोकशोषम् ।
निर्दोषं भावजोषं तनुवचनमनोमोषक्लेशप्रपोषं
कोषं कोषं सुदृष्टं प्रकृतितविमलं शिश्रियुर्मोक्षसौषम् ।।१०।।

इति : श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये
[महाकाव्ये] चारित्रफलाविर्भावक
एकविंशतितमः सर्गः

## जिननामफलाविर्भावकः

### द्वाविंशतितमः सर्गः ।

धरापतिपतेऽखिलस्त्वदनुभाव एष प्रभोः
    यदेत उभयं भवं सफलतां विधाय स्वकम् ।
परं पदमुपासते भवभयात् त्वया रक्षिता
    यशो जगति गीयते विमलबुद्धिभिस्तावकम् ॥१॥
भवन्तमपि कामदं भवनिषूदनं कामदं
    निधाय हृदये परं परिहरन्ति मोक्षाशयाः ।
भजन्ति हरडीरकं स्थलपथं विहायामलं
    स्वदेशमनुयायिनो जलपथं व्रजन्त्यारतम् ॥२॥
स्वराष्ट्रमपहाय ते बहुलपक्षसौख्याकरं
    परं सुखलवापहं समभियान्ति मन्दालसाः ।
वसन्ति विकटाटवीं नगरमध्यमुज्झन्ति हा
    रसन्ति गरलं क्षणादसुहरं विसृज्यामृतम् ॥३॥
पतन्ति जडतः प्रहा वह्निभृते सुवातायनं
    त्यजन्ति विशदालयं हरिगुहामपास्याऽऽसते ।
शुनः स्थितिमहर्पतिं त्वपरिगण्य हा कौशिकं
    श्रयन्ति जनयन्त्यहो जननमात्मनो निष्फलम् ॥४॥
तवेति सुगुणावलीं वदति निर्म्मलां त्वन्मना–
    स्तरन्ति भवसागरं समधिकृत्य कर्णातिथिम् ।
विमृश्य किल यां यथा विषमितद्गुपारं परं
    व्रजन्ति बहुमानवा विमलवर्णमन्त्रावलीम् ॥५॥

जिनेश ! हृतकल्मषो वसति नाममन्त्रः सतां
हृदम्बुजनिकेतने न च दुरात्मनि प्राणिनि ।
पयः सघृतमद्भुतं सुकृतितुष्टिसंतुष्टिदं
शुनो हृदि न तिष्ठति प्रकृतितोऽशुभे पावने ॥६॥
स्थिते हृदि सुनामनि व्रजति पापममन्तर्गतं
सवीर्य इव भेषजे गदकदम्बकं देहजम् ।
जले पिबति तृड्बलं घनघने यथा वर्षति
जनक्षयमथो तमोऽर्यमणिलोकमभ्युद्गते ॥७॥
अहीनबलवद् भवेत् सुकृतिभाषितं नाम ते
न जातु दुरिते स्थितं मुदिरनीरमच्छं यथा ।
सुवप्रपतितं तथोषरगतं जिनाधीश्वर !
वरं क्षितितलेऽवरं भवति वस्तु गौणं गतम् ॥८॥
समेत्य हृदयान्तरे क्षणमपीह याति प्रभो !
विचित्रगतिनाम ते भवति चित्रमात्राधिकम् ।
घनागमभवत् तथा सुकृतभावहेतुः परो
रमागमनवज्जने भवति सेतुरत्राप्ययम ॥९॥
कषायकलुषं यदा व्रजति नाम तत्रान्यतो
न दूषणलवोऽपि ते द्वयमदो नवा तिष्ठति ।
कषायि निकषायि वा विषमभाव एषोऽभितो
जिनेन्द्र ! निकषायता खलु भवान्तसंस्थायिनी ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये
[महाकाव्ये] जिननामफलाविर्भावको
द्वात्रिंशत्तमः सर्गः ।

## तिरश्च–नारकवेदनाविर्भावकः

### त्रयोविंशतितमः सर्गः ।

जगति विजयिँस्त्वां योगीन्द्रं लयाश्रितमानसं
शमनमथनं हित्वा नाथं दयामयमानतम् ।
भविभिरनिशं जन्याक्षीणं रतीशमदापह–
मनयमरतिं पीनाक्षीणां प्रमादपरायणः ॥१॥

अभजमशुभं तैरश्चं दुःखसंकुलमातुरः
परवशमनोवृत्तिहीनः पराहतिपीडितः ।
बहुलतरभाराक्रान्तः क्षुत्परो भयविद्रुतः
कृषिजनिततापश्रेणिः क्लेशभावविडम्बितः ॥२॥

क्षतशततनुः छिन्नाक्षो धूलिभिः परिगुण्डितो
न भवति हितो धर्मो यत्र प्रतापशमः प्रभुः ।
अकरवमपुण्यं पीनं ज्ञानरङ्गपराङ्मुखः
सुमतिरहितस्तत्रार्त्तोऽक्षीणपापभरार्दितः ॥३॥

नरकमसरं तत्रैवेत्थं व्यथां च लभे परा-
मशुचिकरणं वृद्धिप्राप्तं जनिस्थितमादितः ।
भवनपतयः कृतन्ति स्म प्रमोदरसाविलाः
बहिरपि ततः पिण्डीभूतं नयन्ति खरं स्म ते ॥४॥

युवतिमयसः श्लेषं श्लेषं धनञ्जयरूपितां
शशसुरसुरा जल्पन्तो भाषणान्यशिवान्यहो ! ।
अनुभवथ भो प्रागाचीर्णं तमो भवसञ्चितं
नयति हि परं मुक्तं कर्मक्षयं जगदङ्गिनाम् ॥५॥

अथ दुदुविरे यानार्दीस्ताम् विधाय रसाकुला
विषमविषमे मार्गे यान्तो व्रणाङ्कितदेहिनः ।
उपलनिकरे तप्तायोभे व्यथाकुलचेतसो
जिनपवचनं ही श्रुत्वा माद्यतीह कथं जनः ? ॥६॥
उरसि कठिने येषां पादौ निधाय गतालसाः
स्मितविकसिताङ्गोपाङ्गास्तेऽस्फुटं च्युतपुण्यकान् ।
निरयनिरतान् वासोभ्रासानिव प्रगताश्रयान्
जगति विमतिर्मोहो नृणां न किं कुरुते हि किम् ? ॥७॥
पुनरपि मुखं तेषां व्यादाय दुष्टमनोरथाः
ज्वलितमदितेः पुत्रा वेगं न्यधू रमणप्रियाः ।
न खलु मदिरापानं श्रेष्ठं पलादिकभक्षणं
भवति नरके पातो यस्माद् विशामविवेकिनाम् ॥८॥
पुनरपि नवं तप्तं कृत्वाऽम्बरीषमरुन्तुदाः
हसितवदनास्तान् साक्षेपं नलौश्चणकानिव ।
परिबभृजिरे दुःखार्तास्ते ह्यतीवरिरंसवः
रसपरवशं प्राप्ता जीवा शसन्ति शरीरिणः ॥९॥
पुनरपि शमाश्रस्तास्तूर्णं समेत्य रतिस्थितौ
नरकवसतेर्ग्राहं ग्राहं भयाङ्कितविग्रहान् ।
सपदि शिरसि क्षिप्त्वाऽच्छैत्सुर्नवं करपत्रकं
परभवचितं हिंसादीनां फलं हि विजृम्भते ॥१०॥
पुनरपि महापापाः कर्पूमनैषुरहंयवः
ज्वलितजठरान् दर्शं दर्शं पयः कृमिसंकुलम् ।

परिविमनसो वृक्षं निन्युश्च तान् विधुराश्रय-
मसिखरदलं तापाक्रान्तं गतामलपत्रकम् ॥११॥
पुनरपि वराकान् बद्ध्वा दुस्तरा वहति हर्षतः
कथमिति पितमतिबन्धो ! हृथ प्रमदाकुलाः ।
परिकथयतो वारं वारं ततर्जुरिमेऽसुराः
इह हि विरलाः सन्तः पीडां विदन्ति परस्थिताम् ॥१२॥
असुरविहितामित्येवं यातनां विविधां परां
नरकवसतौ भुञ्जानाः कर्मराशिमपासते ।
अथ नरकभूस्थामेवं ते खरां च परस्परां
दुरितभरतः कुर्वन्तो निःसृता दधतेऽसुखम् ॥१३॥
अशुचिनिभृतां पङ्काकीर्णां बिलौघपलाकुला-
मुपलकठिनामुष्मां शीतां सरन्ति धराममी ।
भवति सरतां क्लेशस्थानं रसा नरकाङ्गिना-
मशशितरणिर्नष्टाऽऽस्वादाऽनिशं भयदायिनाम् ॥१४॥
—हरिणीछन्दः ।

कुन्ताकुन्ति-शराशरिप्रभृतकान्यामर्षतो नारका
रूपाणि प्रविधाय मत्सरपरा युध्यन्ति दुष्टाशयाः ।
वैरं वैरिषु पूर्वजन्मजनितं ज्ञात्वा कथञ्चिन्मिथो
ग्राहग्राहमहो कचादिकुधियः छिन्दन्ति गात्राणि च ॥१५॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये
महाकाव्ये तिरश्च-नारकवेदनाविर्भा-
वकद्वयोर्विंशतितमः सर्गः ॥

# जिनगुणाविर्भावकः

## चतुर्विंशतितमः सर्गः ।

जिनपते ! नरकेऽशुभवेदनां
        समनुभूय परामहमप्यथो ।
सुकृततो नरभावमुपागतः
        कथमपि प्रभुदर्शनमाश्रये ॥१॥

मनसि मे वचने जिनविग्रहे
        त्वयि भवान्ततरे समुपागते ।
भवति जन्म मदीयमिदं प्रभो !
        सफलमेकफलं शिवशर्म्मणः ॥२॥

सुरगणे रणकेलिविडम्बिते
        प्रहरणावरणाङ्कितविग्रहे ।
युवतिमण्डलमण्डितमन्दिरे
        कथमधीश ! मनो रमते मम ॥३॥

अशिवमार्गविभाषणतत्परे
        विभवमन्मथरागविराजिते ।
कलहकोपकुलित्वकलङ्किते
        कथमधीश ! गुरौ रमते मनः ! ॥४॥
असुमतां किल यत्र परासनं
        शुचिरभूत् विधुरामविसूचिका ।

स्वहृदयोत्थविकल्पविकल्पनं
कथमहो ! कुमते रमते मनः ? ॥५॥

त्वयि सुधारससारविनिर्मिते
शशकरे प्रवरे जगदुद्गते ।
गुरुतमो रस एति शमं क्षणाद्
रिपुगणो बलवत्तरभूपतौ ॥६॥

वृषकरौघतनौ त्वयि भास्करे
समुदिते विषयामयकौशिकाः ।
समनसि प्रसृते कलहा यथा
तनुभृतां व्ययमिय्रति तीर्थराट् ॥७॥

सुरमणौ रमणीयतनौ त्वयि
सविधमीप्सितदेशमुपागते ।
विरसता हि सुभिक्ष इव क्षितौ
क्षयमुपैति तताविमनस्कता ॥८॥

जलधरे सकलार्तिहरे परे
त्वयि महीवलयं ह्यभिवर्षति ।
ज्वर इवातिशयप्रवरौषधे
मदनताप इयर्ति शमं प्रभो ! ॥९॥

जगति वस्तु न तद् भगवान् भवान्
सुविदुषा गुणवानुपमीयते ।

गुणमितिर्भवतो नयतस्ततो
भगवते सततं भवते नमः ॥१०॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते श्रीफलवर्द्धि-
पार्श्वनाथमाहात्म्ये महाकाव्ये जिनगुणा-
विर्भावकश्चतुर्विंशतितमः सर्गः

तत्समाप्ते समाप्तमेतत् श्रीफलवर्द्धिपार्श्वनाथमाहात्म्य-
मनेकविवेकिवृन्दाध्ययनाध्यापकोचितमाचन्द्रार्कम् ॥